पूर्णानुपूर्णमम्भोधिर्यथा पर्वणि वर्धते ।
तथा विजयिनो लक्ष्मीस्तव माधव वर्धताम् ॥

॥ इति निष्क्रान्ताः सर्वे ॥

Colophon:

पञ्चमोऽङ्कः ॥

पारिजातनाटकं समाप्तम् ॥

श्रीत्यागेश्वराय नमः । श्रीवेङ्कटेशाय मङ्गलम् ॥

Subject: Pārijātaharaṇam 1-5 acts.

Remarks:—The Ms. is in a fairly good condition.

The author of this drama was one Kumāratātārya, whose genealogy is given as follows:—

Śrīnivāsaguru
|
Veṅkaṭācāryaḥ
|
Kumāratātācārya.

The last mentioned person is the author of the present drama. He seems to have composed commentaries on the

Mahābhāṣya of Patañjali, the Vaiśeṣika Sūtras of Kaṇāda, the Sāṅkhya Sūtras of Kapila and the Śrī Bhāṣya of Rāmānuja.

The present work deals with the famous story of the Bhāgavata—(i.e) the Pārijātaharaṇa. The work does not seem to have been printed so far.

॥ पारिजातहरणम् ॥

4382. PĀRIJĀTAHARAṆAM.

Burnell's Catalogue No. 10707. **Page** 167. **Left column.** Substance—**Palm** leaf. Size—16 × 1¼ inches. **Leaves**—58 (47th missing). Lines—5 to a Page. Script—**Grantha.** No. of Granthas—790. Author—**Kumāratātācārya. Incomplete.** (Wants end)

Beginning and subject—Same as No. 4381.

End :

उद्धवः ॥

गृहीतपाणिकमला भवता राजकन्यकाः ।
भाग्यपारम्परीं प्राप्ता यथा यादवनन्दनाः ॥

तथेदानीम् ।

प्राप्यकल्पद्रुमवरं किरन्त्युपवनीलताः ।
स्तबकाञ्जलिभिः पुष्पलाजान्वक्षावपात्र.... ॥

Colophon: (Leaf No. 82)

तृतीयोऽङ्कः ॥

Remarks:—The Ms. is in a fairly good condition. This Ms. ends abruptly towards the close of the fifth act.

॥ पार्वतीपरिणयम् ॥

4383. PĀRVATĪPARIṆAYAM.

Burnell's Catalogue No. 10686 a. Page 169. Left column.

Substance—Palm Leaf. Size—$16\frac{1}{2} \times 1\frac{3}{8}$ **inches**. **Leaves**—26. **Lines**—6 to 8 to a Page. Script—Grantha. No. of Granthas—600. Author—Vāmanabhaṭṭa. Complete.

Beginning:

आदौ प्रेमकषायिता हरमुखव्यापारलोला शनैः
ब्रीलाभारविघूर्णिता मुकुलिता धूमोद्गमव्याजतः ।
पत्युः संमिलिता दृशा सरभसव्यावर्तनव्याकुला
पार्वत्याः परिणीतिमङ्गलविधौ दृष्टिः शिवायास्तु वः ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

पर्जन्यो वृष्टिमिष्टां प्रदिशतु जगतो भाग्यसम्पादयित्रीं
शश्वत्सस्यैः प्ररूढैर्भवतु पुलकिता सर्वतो भूतधात्री ।
वर्धन्तां वीतविघ्नाः स्फुरदुपकृतयः सम्पदः सज्जनानां
नित्यानन्दो महेशो निरतिशयसुखप्राप्तये कल्पतां वः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

पञ्चमोऽङ्कः ॥

पार्वतीपरिणयं नाम नाटकं सम्पूर्णम् ॥

॥ समाप्तम् ॥ हरिः ॐ ॥

विनायकाय नमः । परमेश्वराय नमः । शुभमस्तु ॥

ஸ்ரீநாயகஸ்வாமி ஸ்ரீ எழுத்து

करकृत + सन्तः ॥

Subject: Pārvatīpariṇaya 1-5 acts.

Remarks:—The Ms. is in a good condition. The other work contained herein is a copy of the same Nāṭaka.

The Pārvatīpariṇaya of Vāmana Bhaṭṭa Bāṇa is a dramatic rendering of the Kumārasambhava of Kālidāsa. The work has been printed in the Śrī Vāṇī Vilās Press with an excellent introduction on the date and identity of the author by Pandit R. V. Krishnamacharyar.

॥ पार्वतीपरिणयम् ॥

4384. PĀRVATĪPARIṆAYAM.

Burnell's Catalogue No. 10686 b. Page 169. Left column. Substance—Palm leaf. Size—16½ × 1¾ inches. Leaves—26. Lines—6 to a Page. Script—Grantha. No. of Granthas—600. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning, end and subject—Same as No. 4383.

Colophon:

पार्वतीपरिणयं नाम नाटकमिदं सम्पूर्णम् ॥

हरिः ॐ ॥ शुभमस्तु ॥

कल्याणसुन्दर्यै नमः । श्रीदेव्यै नमः ॥

पार्वत्यै नम ॥ नागेश्वरमूर्तये नमः ।

आनन्दवल्ल्यै नमः ॥ सोमास्कन्दपरमेश्वराय नमः ॥

यादृशं + नविद्यते ॥

Remarks:—The Ms. is in a fairly good condition. On the title page is given

ஸேதுக்ஷேத்ரவாஸீ ஶேஷாத்ரி தீக்ஷித க்ருதம் வாத்ஸ்யகம் பா-

ர்வதீபரிணயம் நாம நாடகம்

॥ पार्वतीपरिणयम् ॥

4385. PĀRVATĪPARIṆAYAM.

S. K. Collection No. 219. Substance—Paper. Size—10½ × 4 inches. Sheets—36. Lines—6 to 8 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Vāmana Baṭṭabāṇa. Complete.

Beginning, end, colophon and subject—Same as No. 4383.

Remarks:—The Ms. is in a fairly good condition.

॥ पार्वतीपरिणयम् ॥

4386. PĀRVATĪPARIṆAYAM.

S. K. Collection No. 221. Substance—Paper. Size—10 × 4½ inches. Sheets—16. Lines—13 to 15 to a Page. Script—Devanāgarī. No. of Granthas—600. Author—Vāmana Bhaṭṭabāṇa. Complete.

Beginning, end, colophon and subject—Same as No. 4383.

Remarks:—The Ms. is in a fairly good condition.

॥ पार्वतीपरिणयम् ॥

4387. PĀRVATĪPARIṆAYAM.

J. L. Collection No. 627. Substance—Paper. Size—9½×4 inches. Sheets—14 (4th sheet is missing out of 1-15). Lines—12 to 14 to a Page. Script—Devanāgarī. No. of Granthas—580. Author—Vāmanabhaṭṭabāṇa. Incomplete.

Beginning, end, colophon and subject—Same as No. 4383.

Remarks :— The Ms. is in a fairly good condition.

॥ प्रचण्डराहूदयव्याख्या ॥

4388. PRACAṆḌARĀHŪDAYAVYĀKHYĀ.

J. L. Collection No. 628. Substance—Paper. Size—7¾×5 inches. Sheets—2. Lines—17 to a Page. Script—Devanāgarī. No. of Granthas—65. Author—? Complete.

Beginning:

वेदव्यासाय नमः ॥

धुरि । पुरः । अयनम् मार्गः । दर्दुरः मण्डूकः । कलशाम्बु ·........हिमाद्रि । सदसत् । सतामयो-ग्यम् । किशोरकः पक्षिचित्रः । विशारदश्च ।

End

सवो यज्ञः । सुरतेति नगरविशेषः । मन्दोदरीजानि-शासनो रामभद्रः । मया लक्ष्म्या चेति व्यज्यते । हरिः परमात्मा । शृङ्गाटकं चतुष्पथमिति दिक् ।

Colophon:

पञ्चमोऽङ्कः । सम्पूर्णं प्रचण्डराहूदयव्याख्यानम् ॥

Subject: Pracaṇḍarāhūdayavyākhyā meaning of only a few words are given in 1-5 acts.

Remarks: —The Ms. is in a fairly good condition.

Pracaṇḍarāhūdaya is a drama of the type of the Prabodhacandrodaya, by Ghanaśyāma. The original is now lost to us. The present Ms. is a commentary on the drama probably by the author of the text itself.

The work is not available in print.

॥ प्रबोधचन्द्रोदयः ॥

4389. PRABODHACANDRODAYAH.

Burnell's Catalogue No. 5177. Page 169. Right column. Substance—Paper. Size—10¾ × 3½ inches. Sheets—49. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1050. Author—Kṛṣṇamiśra. Complete.

Beginning:

मध्याह्नार्कमरीचिकास्विव पयःपूरो यदज्ञानतः

खं वायुर्ज्वलनो जलं क्षितिरिति त्रैलोक्यमुन्मीलति ।

यत्तत्त्वं विदुषां निमीलति पुनः स्रग्भोगिभोगोपमं

सान्द्रानन्दमुपास्महे तदमलं स्वात्मावबोधं महः ॥

End:

पर्जन्योऽस्मिन् जगति महतीं वृष्टिमिष्टां विधत्तां

राजानः क्ष्मां गलितविविधोपद्रवाः पालयन्तु ।

तत्त्वोन्मेषोपहततमसः त्वत्प्रसादान्महान्तः
संसाराब्धिं विषयममतातङ्कपङ्कं तरन्तु ॥
इति निष्क्रान्ताः सर्वे ॥

Colophon:

षष्ठोऽङ्कः ॥

प्रबोधचन्द्रोदयं नाम नाटकं समाप्तम् ॥

बालाचार्यस्य भवतात् भवतापविनाशकः ।
श्रीकृष्णभक्तिसन्ध्यायामुषद्बोधसुधाकरः ।
लिखापितं सतां प्रीत्यै विभवे विभवेषुणा ।
वर्षे वर्षासु रोहिण्यां रोहिणीशस्य वासरे ॥
जयश्रीगोपाल पालय माम् ॥

Subject. Prabodhacandrodaya 1-6 acts.

Remarks:—The Ms. is in very good condition. Borders are sulpherated.

Kṛṣṇamiśra the author of this very famous drama flourished probably in Bengal in the 11th century. The work is unique of its kind, and is intended to expound the doctrines of Advaita Vedanta. The work has been printed by the Nirṇayasagar Press, Bombay.

Descriptive No.	Collection No.	Substance	Size inches	No. of Sheets or leaves.
4390	B. L. 5171	Paper.	$8 \times 4\frac{1}{4}$	62
4391	,, 5172	do.	$11\frac{3}{4} \times 4\frac{7}{8}$	32
4392	,, 5173	do.	$9\frac{1}{2} \times 4\frac{1}{2}$	51
4393	,, 5174	do.	$8\frac{7}{8} \times 3\frac{3}{4}$	66
4394	,, 5175	do.	$9\frac{3}{4} \times 4\frac{1}{4}$	51
4395	,, 5178	do.	$11\frac{1}{2} \times 4\frac{3}{4}$	34
4396	,, 5179	do.	$9\frac{1}{8} \times 5\frac{1}{2}$	20
4397	J. L. 629	do.	$9\frac{1}{4} \times 4\frac{1}{4}$	71
4398	,, 630	do.	$11 \times 5\frac{1}{2}$	50
4399	T. S. 733	do.	12×6	42
4400	S. S. 75	do.	$9\frac{1}{2} \times 4$	70
4401	B. L. 10580	Palm leaf.	17×1	39
4402	S. K. 217	Paper.	$10\frac{1}{2} \times 4$	50
4403	B. L. 10581	Palm leaf.	$15 \times 1\frac{1}{4}$	33
4404	J. L. 631	Paper.	$9\frac{3}{4} \times 1\frac{1}{2}$	27
4405	S. S. 50 b	Palm leaf	$9\frac{1}{2} \times 1\frac{1}{4}$	
4406	B. L. 5180	Paper.	$11 \times 5\frac{1}{2}$	20

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
10	Devanāgarī.	Complete.
11	do.	„
9	do.	„
8	do.	„
8-12	do.	„
11	do.	„
20	do.	„
8	do.	„
10	do.	„
12-14	do.	„
8	do.	„
6	Grantha.	Incomplete. (1-6 Acts wants end)
10	Devanāgarī.	„ „
6	Grantha.	„ (1-3 Acts.)
12	Devanāgarī.	„ (1-3 Acts wants end)
9 or 10	Malayālam.	„
8 or 9	Devanāgarī.	„

॥ प्रबोधचन्द्रोदयव्याख्या ॥

4407. PRABODHACANDRODAYAVYĀKHYĀ.

J. L. Collection No. 632. Substance—Paper. Size—7½ × 5 inches. Sheets—52 (41-44 missing out of 56). Lines—18 or 19 to a Page. Script—Devanāgarī. No. of Granthas—2100. Author—Ghanaśyāma. Incomplete.

Beginning:

श्रीगणपतये नमः ॥ श्रीसरस्वत्यै नमः ॥

को ब्रह्मा विष्णुरुद्रशम्भुरीशोऽमी यद्दृशे त्रयः ।
केशवः सोऽस्तु भाष्योक्तश्चित्ते परशिवाभिधः ॥

* * *

वन्दे ब्रह्मपरं चिदम्बरगुरुं पूर्वाश्रमे मेऽग्रजं
यस्यारामसरोऽग्रहारयुगधिष्ठानं सुमन्त्रं मठी ।
श्रीरामेश्वरमार्गशास्त्रि महिषाभिख्यासुरन्ध्याः पुरो
देवीपट्टणतीर्थभाजिनवपाषाणस्थले शोभते ॥ ६ ॥

* * *

वाणि स्पर्धदि रङ्गजाच्चरिमहोपाध्यायभोजादय-
स्तेऽलंबोद्धुमिहात्रयोरतुलयोरैकात्म्यमेवं सती ।
दृष्ट्वा मत्कृतविद्धसालविभृतिं तस्यै च मह्यं मुधा
दुह्यन्ती भवदात्मने स्वगुरवे स्वल्पा चिरञ्जीवितु ॥ १२ ॥

प्रबोधचन्द्रोदयसेर्ष्यजातसङ्कल्पसूर्योदयशोणदृष्टेः ।
प्रचण्डराहूदयकर्तुरेव बाभात्यहो श्मश्रुणि यस्य हस्तः ॥ १३ ॥

* * *

घनश्यामेन वक्तव्यो भावः कृष्णस्य नेतरैः ।
विशेषणविशेषाख्यसम्बन्धः शुभयोर्यतः ॥ १६ ॥

पदान्वयार्थाशयवेदशास्त्र-
प्रमाणवाक्यादिविवेचनं नः ।
व्याख्याकृतां तुल्यमयं न दोषो
रामायणं साक्ष्यमरेऽत्र धीराः ॥ १७ ॥

* * *

स्थालीपुलाकन्यायेन मयाविस्तरभीरुणा ।
अन्यटीकाकृतां दोषस्तत्र तत्र प्रकाश्यते ॥ २१ ॥
अथैतन्नाटकस्थायिसंविधानावबोधने ।
वस्तुमात्रादिनिर्देशः क्रियते सङ्ग्रहान्मया ॥ १ ॥

* * *

समभतिरिहाधिकारी प्राप्यमविद्यानिवृत्तिरेव फलम् ।
प्रतिपाद्यप्रतिपादकभावः सम्बन्धमुक्तमद्वैतम् ॥ २२ ॥

अथ चेदिपतिं कर्णं विजित्य पुनर्निजसाम्राज्ये स्वस्य सखायं चन्द्रवंश्यं कीर्तिवर्माणं राजानमभिषिक्तवता परशुरामेणेव विप्रवीरेण गोपालेन धनादिभिः परितोष्य निर्दिष्टः "काव्यं यशसेऽर्थकृते" इति न्यायं यथार्थीकुर्वन् मिश्रब्राह्मणः कृष्णमिश्रो नाम प्रबोधचन्द्रोदयाभिधानं नाटकं चिकीर्षुः एष वृद्धाचारप्रमाणमिति समुदाचारमनुसरन् निर्विघ्नपरिपूरणाय "एक एव रुद्रः" इति श्रुत्यर्थं "तदेकोऽवशिष्टः शिवः केवलोऽहम्" इति भगवत्पादोप-

दिष्टमद्वैतमणिमधिमनःपेटिनिवेशयन्नेव तदनुसारेण मङ्गलं चरीकरीति ॥ मध्याह्नेति ॥

End:

विषयेषु भोगेषु ममतया ममत्वपाशेन हेतुना यः आतङ्कः परिणामे भयं तदेव पङ्कः कर्दमो यस्मिन् तं संसाराब्धिं तरन्त्विति दिक् ॥

Colophon:

इति महाराजपद ० प्रबोधचन्द्रोदयसञ्जीवनाख्यटिप्पणे षष्ठोऽङ्कः ।

सम्पूर्णमिदं व्याख्यानं घनश्यामपण्डितीयम् ।

Subject: Prabodhacandrodayavyākhyā otherwise known as Sañjīvanī 1-6 acts.

Remarks:—The Ms. is in a fairly good condition. A paper transcript of this Ms. is found in this library. See T. V. No. 478.

Ghanaśyāma's commentary on the Prabodhacandrodaya is not available in print.

॥ प्रबोधचन्द्रोदयव्याख्या ॥

4408. PRABODHACANDRODAYAVYĀKHYĀ.

J. L. Collection No. 638. Substance—Paper. Size—7½ × 5 inches. Sheets—97. Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—2400. Author—Ghanaśyāma. Incomplete.

Beginning—Same as No. 4407.

End:

प्रधानात्प्रकृतेरुपादानाज्जगदुद्भवः । पुरुषो निर्लेपः । अम्भोजपर्णवदिति कारिकायाम् । तथाचोक्तम् ॥

Colophon : Nil.

Subjcet: Prabodhacandrodayavyākhyā 1-7 acts.

Remarks:—The Ms. is in good condition. This Ms. abruptly ends towards the close of the Seventh act. On the title page is given:

प्रबोधचन्द्रोदयव्याख्या ॥ घनश्यामपण्डितीयं मातृका ॥

॥ प्रबोधचन्द्रोदयव्याख्या ॥

4409. PRABODHACANDRODAYAVYĀKHYĀ.

Burnell's Catalogue No. 5181. Page 169. Right column. Substance—Paper. Size—14 × 5½ inches. Sheets—10. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Rāmadāsa. ? First act only.

Beginning:

रामं विनायकं वन्दे सदानन्दं गुणाकरम् ।
संसारतापसंहारकारणं विघ्नवारणम् ॥

End:

वेश्येति ॥ धूर्तैः ऽवकैः दिवा दिन एव * कीदृशैर्धूर्तैः । शीधुः मद्यः तद्गन्धो यत्र तादृशललनावक्त्रं कामिनीमुखम् । तत्र आसवो

Colophon:

इति प्रबोधचन्द्रोदयव्याख्याने प्रकाशाख्ये प्रथमोऽङ्कः ॥

Subject: Prabodhacandrodayavyākhyā.

Remarks:—The Ms. is in a fairly good condition. Alternate sheets are sulpherated.

|| प्रबोधचन्द्रोदयव्याख्या ||

4410. PRABODHACANDRODAYAVYĀKHYĀ.

T. S. Collection No. 732. Substance—Paper. Size—10½ × 3½ inches. Sheets—25 (16-40) Lines—8 to 9 to a Page. Script—Devanāgarī. No. of Granthas—225. Author—Subrahmaṇya. Incomplete.

Beginning:

|| सोपीति ||

सोपि स्ववीर्यादवतार्य भारं
भूमेः समुत्खाय कुलं नृपाणाम् ।
प्रशान्तकोपज्वलनस्तपोभिः
श्रीमान्मुनिः शाम्यति जामदग्न्यः ॥

|| व्या || तपोभिरुपलक्षितः सन् शाम्यतीत्यन्वयः ।

End:

बीजकार्याणां मध्ये केषाञ्चिल्लिप्सत्या तस्यालक्ष्यत्वमिति दशरूपके व्याख्यातम् । चिन्तामणौ तु क्वचिन्नैर्लक्ष्यत्वम् । क्वचिदन्तरायैर्लक्ष्यत्वमिति व्याख्यातम् ॥

Subject. Prabodhacandrodayavyākhyā.

Remarks:—The Ms in. is a fairly good condition.

|| प्रसन्नराघवम् ||

4411. PRASANNARĀGHAVAM.

Burnell's Catalogue No. 5311. Page 169. Right column. Substance—Paper. Size—14¼ × 5⅞ inches. Sheets—65.

Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1700. Author—Jayadeva. Complete.

Beginning:

चत्वारः प्रथयन्तु विद्रुमलतारक्ताङ्गुलिश्रेणयः
श्रेयः शोणसरोजकोरकरुचस्ते शार्ङ्गिणः पाणयः ।
फालेष्वब्जभुवो लिखन्ति युगपद्ये पुण्यवर्णावलीः
कस्तूरीमकरः पयोधरयुगे गण्डद्वये च श्रियः ॥

End:

रामः । तदा गच्छत । पुष्पकादवतार्य गुरुबन्धुपौरजनमानन्दयामः । (इति पुष्पकादवतरणमभिनाटयन्तः) सर्वे निष्क्रान्ताः ॥

Colophon:

इति सप्तमोऽङ्कः ॥ इति श्रीजयदेवकविविरचितं प्रसन्नराघवनामनाटकं सम्पूर्णम् ॥

Subject: Prasannarāghava 1-7 acts.

Remarks:—The Ms. is in excellent condition.

Jayadeva, the author of this drama combines in himself rare capacities. He was otherwise known as Pakṣadharamiśra and was a famous Naiyāyika. He is the author of the famous Gīta Govinda. The present drama deals with the story of the Rāmāyaṇa. It has been published by the Nirṇayasāgar Press, Bombay.

Descriptive No.	Collection No.	Substance	Size inches	No. of Sheets or leaves
4412	B. L. 5192	Paper.	14×6	59
4413	„ 5193	do.	9¾×5	68
4414	„ 5194	do.	11¾×8⅞	69
4415	„ 5195	do.	12×5	45
4416	„ 10591	Palm leaf.	15¾×1½	73
4417	„ 10592	do.	7½×1¼	62
4418	„ 10593	do.	17×1¼	54
4419	J. L. 634	Paper.	9¼×4	76
4420	B. L. 10594	Palm leaf.	8½×1½	165
4421	„ 10595	do.	17½×1½	66
4422	„ 10596	do.	14¾×1¼	16
4423	J. L. 635	Paper.	10¼×3¾	45
4424	B. L. 5196	do.	10¼×4	22
4425	J. L. 636	do.	9¼×4	9
4426	„ 637	do.	10×4⅛	12

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
11	Devanāgarī.	Complete.
12 or 13	do.	,,
7	do.	,,
11	do.	,,
7	Grantha.	,,
6 or 7	do.	,,
7	do.	,,
10	Devanāgarī.	,,
4 or 5	do.	Incomplete. (1-7 Acts, wants end and some leaves in the middle.)
4-6	Grantha.	,,(1-7 Acts, wants end.)
7 or 8	do.	,, (1-2 Acts.)
5 or 6	Devanāgarī.	,, (1-3 Acts wants end)
7	do.	,, (1st Act wants end.)
11	do.	,, ,,
12	do.	,, (1-7 Acts fragmentary sheets)

॥ भावनापुरुषोत्तमम् ॥

4427. BHĀVANĀPURUṢOTTAMAM.

Burnell's Catalogue No. 10679. Page 170. Left column.

Substance—Palm leaf. Size—17¼ × 1 inches. Leaves—113. Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—2100. Author—Ratnakeṭaśrīnivāsa-dīkṣita. Complete.

Beginning:

श्रीनिवास तव पादसरोजे चित्तमस्तु मम...... ।
......निवृत्यै निःससार यत एव हि गङ्गा ॥

श्रीरस्तु श्रेयसे वः सदसि दिविषदां क्षीरसिन्धुप्रदेशे
देवानन्यानुपेक्ष्य द्रुहिणहरमुखान्दैवतस्तब्धबोधान् ।
नित्यानन्दप्रबोधं निरवधिकगुणं नैगमज्ञानगम्यं
स्वच्छन्दं पर्यणैषीच्चिदचिदवयवं शेषिणं या मुकुन्दम् ॥

* * *

(॥ नान्द्यन्ते सूत्रधारः ॥)

(परिक्रम्यावलोक्य ।)

मध्येकौस्तुभमात्मनः प्रतिकृतिं दृष्ट्वा पराशङ्कया
कोपेनानतकन्धरा पदनखादर्शे पतिं बिम्बितम् ।
मत्वा पादनतं प्रहृष्यकुतुकादाश्लिष्य तज्जानती
सव्रीला स्मितमौनबन्धुरमुखी श्रीरस्तु वः श्रेयसे ॥

(इति पुष्पाञ्जलिं विकीर्य)

(नेपथ्याभिमुखमवलोक्य)। आर्ये किमिति विल-

म्भ्यते । अद्य खलु विकसितानि विलसितानि त्रिविधवि-
धेयस्य भरतकुलभागधेयस्य ।

(प्रविश्य) नटी ॥ सादरम् । अय्य कहं विअ ।

सूत्र ॥ अहो महती भवदीयकुतूहलपरिणतिः मदीयकर-
णीयनिर्वहणीयतायाम् । इदमाकर्ण्यताम् । अस्ति खलु
निस्तुलनिजविनरणगुणनिरस्तसमस्तस्वस्तरुप्रशस्तिविस्तार-
श्रीकर्णाटकसिंहासनप्रतिष्ठापकाचार्यः * *

* * अनवरतविरचितदशधेनूपधेनुप्रमुखविविधदान-
परितोषितमहीसुरनायकालङ्कृतवेङ्कलापुरपोतसमुद्रसूर-
समुद्रप्रमुखमहाग्रहारनिर्माणपारीणः फणिपतिशिखरिभ-
वनहरिचरणपरिचरणकुतुककोरकितहृदयश्रीमदार्यक्षत्रकुल-
चूडामणिः फणिसार्वभौम इव श्रीमन्मणिनागपुरव-
राधीश्वरः त्रिपुरविजयीव धवलाङ्कभीमः * वेङ्कला-
म्बागर्भशुक्तिमुक्तामणिश्रीपोतभूपालकल्पतरुपचेलिम-
फलाकारः * अनुजाभ्यां श्रीदिवाकरभैरवनायकाभ्या
मुक्तासमानश्रीमूरपनायको नाम । यस्य खलु

फणिस्त्रैणश्लाघ्ये प्रतिनवसुधाफेनधवले
हरस्याभिप्रायश्रवणकलिते भूषणतया ।
प्रतापव्याजेन प्रकटितफणारत्नकिरणे
यशःशेषे नूनं स्वपिति गगनश्रीसहचरः ॥

सुधारसकिरोगिरः सुरभयन्ति विश्वं कवेः
समापतिरसौ नृपः सहृदयाग्रणीः सूरपः ।
परिस्फुरितभावना भगवतः कथा पावनी
पचेलिमपरिश्रमा परममी वयं नाटके ॥

* ❀ *

सू ॥ मैव चिन्तया भूयताम् ।
तौ परिव्राजिकासिद्धशक्तिः सङ्कटयेदियम् ।
सशिष्यायोगविद्येव भावनापुरुषोत्तमौ ॥

॥ प्रस्तावना ॥

End:

तथापीदमस्तु भरतवचनम् ॥
श्रीमन्तो विष्णुभक्ता विदधतु विबुधा वेदमार्गप्रतिष्ठा-
मिष्टां वृष्टिं लभन्तामतिधरणिजनाः सन्तु........सन्तः ।
शेञ्जीवामानुरागी जलनिधितनयालिङ्गितो वेङ्कटेशः
श्रीपोतक्ष्मापसूराक्षितिरमणशुभोन्मेषणं किञ्च दत्ताम् ॥

॥ अपि च ॥

.. ..रापरिभवनहेलापरिणम-
द्रसःस्रोतोवीचीमधुरिमसमीचीनफणितीन् ।
चिरं रक्षन्पोतक्षितिपकलशाम्भोनिधिसुधाः
...चिश्री...............दीव्यतु जयी ॥

॥ किञ्च ॥

.........नवैय्यपक्षितिपति भ्राजिष्णु पार्श्वद्वयो
वाणिवल्लभ..................

...भीनूपलालयन्.........सान्द्रामृतस्यान्दिन(?)

श्रीमान् सूरमहीपतिर्विजयतामाचन्द्रमातारकम् ॥

Colophon:

इति श्रीनिवासातिरात्रयाजिनः कृतौ श्रीपोतभूपालतनयश्रीसुरपतिकारिते भावनापुरुषोत्तमाभिधाने......... (पञ्चमोऽङ्कः) ॥

हरिः ॐ सर्वधारिसमेमीनमासे राकातिथाविदम् ।

उत्तरर्क्षे कविदिने समाप्तं नाटकं परम् ॥

बिन्दुदुर्लिपि+सज्जनाः ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ।

Subject: Bhāvanāpuruṣottama 1-5 acts.

Remarks:—The Ms. is in a decaying condition.

Bhāvanāpuruṣottamanāṭaka is of the type of the Prabodhacandrodaya of Kṛṣṇamiśra. The work has been composed to advocate the principle of Advaita Vedānta. The author is Ratnakheṭa Śrīnivāsa Dīkṣita, for whose works etc., refer to the Introduction by Mr. T. R. Chintamani M.A. to the Adyar Library Edition of Rājacūḍāmaṇi's Rukmiṇīkalyāṇa. The work is not yet published.

॥ भावनापुरुषोत्तमम् ॥

4428. BHĀVANĀPURUṢOTTAMAM.

Burnell's Catalogue No. 10680. Page 170. Left column. Substance—Palm leaf. Size—16¾ × 1¼ inches. Leaves—95. Lines—5 or 6 to a Page. Script—Grantha. No. of Granthas—2050. Author—Ratnakheṭaśrīnivāsadīkṣita. Incomplete. (Wants end)

Beginning:

वस्त्वस्तु श्रेयसे वः etc., Same as No. 4427.

End:

(विवाहमण्डपं निर्वर्ण्य) । इदमिदानीम् । उ.... यमानचा-
मरक्षोरकपाध्मायमान..........च्चंमानकुलदैवतमालि-
ख्यमानविधिमङ्गलालेख्यमानीयमान....................

Colophon: (Leaf No. 78).

चतुर्थोऽङ्कः

Subject: Bhāvanāpuruṣottamam 1-5 acts.

Remarks:—The Ms. is in good condition. Last few leaves are completly broken and gone. This Ms. abruptly ends in the middle of the fifth act.

॥ भावनापुरुषोत्तमम् ॥

4429. BHĀVANĀPURUṢOTTAMAM.

Burnell's Catalogue No. 10681. Page 120. Left column. Substance—Palm leaf. Size—18¼ × 1½ inches. Leaves—45. Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—1100. Author—Ratnakheṭaśrīnivāsadīkṣita. Incomplete.

Beginning—Same as No 4428.

End:

जीवदेवः— भगवन् प्रणमामि । श्रीमानगतो भग-
वतः सखा यः आगतश्च प्रेषितश्च । तेनोक्तं भवत्पार्श्वे
भूमौ जन....

Colophon: (Leaf No. 38)

इति भावनापुरुषोत्तमाभिधाने नाटके तृतीयोऽङ्कः ।

Subject: Bhāvanāpuruṣottama, 1-4 acts.

Remarks :—The Ms. is in decaying condition. This Ms. abruptly ends towards the close of the fourth act.

॥ मदनमञ्जरीनाटकम् ॥

4430. MADANAMAÑJARĪNĀṬAKAM.

Burnell's Catalogue No. 10684. Page 170. Left column. Substance—Palm leaf. Size—17½×1½ inches. Leaves—69. Lines—7 to a Page. Script—Grantha. No. of Granthas—2000. Author—Vīḷinātha. Complete.

Beginning:

कल्याणं स महेश्वरो दिशतु यः कैलासमुल्लासतो
धून्वन्तं दशकन्धरं दृढतरं न्यस्ताङ्घ्रिपद्माग्रतः ।
आगन्तुं बलिमन्दिरस्य रचयन्नायासलेशं विना
भीत्याश्लिष्टवतीमतीव गिरिजां प्रीतामतानीत्क्षणात् ॥

* *

(॥ नान्द्यन्ते सूत्रधारः ॥)

(सर्वतो विलोक्य)। (सानन्दातिशयम् ॥) अहो मकुटावतंसमहो विभवधवलीकृतचोलावनीमण्डलस्य समुत्तुङ्गहरिनदीतरङ्गसङ्कृतालवृन्तापनीयमानसन्ध्याताण्डवपरिश्रमस्य पुण्डूकोदण्डतन्त्रसिद्धान्तविभूषितवामभागस्य भगवतस्तेजिनीवनेश्वरस्य प्रवृत्त एव चैत्रयात्रामहोत्सवः ।

* * *

सूत्र ॥ आर्ये किं बिभेषि ॥ यतो मदनमञ्जरीमहोत्सवं नाम विद्यते मम वशे शृङ्गारविभवशेवधि सरस-

पदसन्दर्भमाणिदामहाटकपेटकं नाटकम् । तच्च तत्तादृग्लक्षणलक्षिततया सर्वातिशायितया मान्या एव वयं परिषदः ॥

नटी ॥ अय्यउत्त विज्जमाणेसु विविहेसु णाडएसु कहं अस्स सव्वातिसायित्तणम् (आर्यपुत्र विद्यमानेषु विविधेषु नाटकेषु कथमस्य सर्वातिशायित्वम् ।)

सू ॥ आर्ये किं न जानासि ॥

अवेक्षितं यत्सकृदात्मगोचरं
पुनः पुनः पुष्यति कामपि स्पृहाम् ।
परत्र सारस्यधियञ्च बाधते
समश्नुते तत्सकलातिशायिताम् ॥

तथाविधं चेदं नाटकमिति ॥

सूत्र ॥ अस्ति किल चोलेषु प्रशस्तिमानमनवरतमास्तिकविविधविद्वज्जनवेदशास्त्रघोषविभ्राजिष्णुः विष्णुपुरं नाम महानग्रहारः । तत्र कश्चिद्विपश्चित् अखिलकलाकलापदेशिकः कौशिकवंशमुक्तामणिः सूक्तिनिकरपारदृश्वभिः स्वशिष्यैरेव दिगन्तरेषु निरन्तरविस्तार्यमाणयशोवितानः प्राथमिकस्यैव साक्षा... पुरुषार्थस्य षड्वेदादिविद्यावल्लभो नाम ॥

सू ॥ आर्ये न किमिदं श्रूयते । पुरा खलु द्विजास्थानीमास्थितस्य ऋग्यजुःसामबहुवारमारोहणावरोहणक्रम-

पाठघाटीं परीक्ष्य कैश्चिद्विपश्चिदवतंसैः साकमच्युतराय-
चूडामणिः मणिभूषणग्रामपारितोषिकप्रदानपुरःसरं प्र-
यासतौल्येन पुनरीदृशीमाख्यामाभिख्यातवान् ॥

नटी ॥ (सविस्मयानन्दम्) । तदो तदो । (ततस्ततः)

सू ॥ अथ हि विद्यते तदीयान्वयरत्नदीपस्य तादृशस्य
यज्ञनारायणसुधियः पौत्रः कनकसभापतिसुमतेरात्म-
संभवः शाम्भवानुकम्पासंपादितविश्रुतविनयादिगुण-
गणसनाथो श्रीलि(?)नाथो नाम कविः ॥

* * *

सू ॥ (कर्णं दत्वा) एष तावदार्ये तव भ्राता रघुचू-
डामणिः कल्पितनन्दिकेश्वरभूमिकापरिग्रहः समागत
एव । तदावामप्यनन्तरवर्णिकापरिग्रहणाय सज्जीभवावः ॥

॥ इति निष्क्रान्तौ ॥ प्रस्तावना ॥

End:

देवः ॥ (प्रसादातिशयमभिनीय) किं वा भूयः प्रि-
यमुपहरामि ॥

धर्मध्वजादयः ॥ किमितः परमपि प्रियमस्ति ॥

तथापीदमस्तु भरतवाक्यम् ।

रक्षन्तु क्षितिरक्षिणः क्षितिमिमां द्राघीयसा तेजसा
स्वस्वाचारपथैकचङ्क्रमविधौ स्वच्छन्दमास्तां जनः ।
वाग्देवीसहवासकेलिरसिका वर्तेत लक्ष्मीः सदा
सस्यानाश्वसमृद्धिभिर्वसुमती शस्याभितः(सत्याभिधा) स्यादियम् ॥

॥ इति निष्क्रान्ताः सर्वे ॥

Colophon:

॥ पञ्चमोऽङ्कः ॥

Subject: Madanamañjarī 1-5 acts.

Remarks:—The Ms. is in a fairly good condition.

The author of this drama, Viḻinātha was the son of Karaka-sabhāpati, who was himself the son of Yajñanārāyaṇa of Kauśikagotra. The author belonged to the village of Viṣṇu-puram in the Tanjore District.

॥ मदनमञ्जरीनाटकम् ॥

4431. MADANAMAÑJARĪNĀṬAKAM.

Burnell's Catalogue No. 10685. Page 170. Left column. Substance—Palm leaf. Size—$20\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—39. Lines—8 to 10 to Page. Script—Grantha. No. of Granthas—2000. Author—Viḻinātha. Complete.

Beginning, end, colophon and subject—Same as No. 4430.

Remarks:—The Ms. is in a decaying condition. The portion up to the end of Prastāvanā is wanting in this Ms.

॥ मरकतवल्लीपरिणयम् ॥

4432. MARAKATAVALLĪPARIṆAYAM.

Burnell's Catalogue No. 10690. Page 170. Left column. Substance—Palm leaf. Size—$15\frac{3}{8} \times 1\frac{1}{4}$ inches. Leaves—20. Lines—6 to a Page. Script—Grantha. No. of Granthas—400. Author—Śrīnivāsa. Complete.

Beginning:

द्राक्षेक्षुद्रवमेलनसाक्षि जगद्रक्षणोल्लसद्दक्षम् ।
वक्षस्थलस्थलक्ष्मीलक्षितमाद्यं महो जयति ॥

* * *

॥ नान्द्यन्ते सूत्रधारः ॥

विश्वेषामवनेन यस्य विभवो यत्राधिरुद्रादयो
यो भक्तेः परवाननन्यमनसो यस्मै समुद्युञ्जते ।
येनौत्सुक्यवती श्रुतिर्जगदभूद्यस्मादुपादाय यं
स श्रेयांसि समर्थयेत नृहरिः सर्वत्र नः सर्वदा ॥

(इति पुष्पाञ्जलिं विकीर्य)

भो भो सभास्ताराः

विद्याजन्मभुवो विरिञ्चनकलासाफल्यसम्पादका
वेलातीतदयाविशुद्धमनसो विस्तीर्णविख्यातयः ।
विध्वस्तभ्रमसंशया व्यपगतासूया वितण्डादुहो(?)
वन्द्या वादवदान्यवाग्विलसिताः सन्तो भवन्तो मम ॥

तदिह द्रमिडोपनिषद्विवरणपरमगुरुमाधवाचार्य-वंशमुक्तामणेर्भारद्वाजकुलजलधिकौस्तुभस्य श्रीदेवराजाचार्यस्य तनयेन श्रीनिवासकविना विरचितेन मरकतवल्लीपरिणयाभिधानेनाभिनवेन नाटकेन भवतः परितोषयामि ॥

End:

नारदः ॥ देवब्रह्मादिसभाजनने प्रेयस्या लाभेन च वर्धसे । किन्ते भूयः प्रियमुपहरामि ॥

देवः ॥ किमितः परमाशास्यम् ।

श्रीनाथमुनिमुखानां भवतां सङ्कल्पकल्पकफलं तत् ।

यदियं दयितावाप्ता राज............ ॥

तथापीदमस्तु भरतवाक्यम् ॥

स्वस्ति स्ताद्विदुषां विशुद्धमनसां विद्या ततो वर्धतां
धर्मस्तत्प्रतिपादितो विजयतां........... ।
वात्सल्यैकनिधिः समस्तफलभूर्देवो विजेजीयतां
तत्कैङ्कर्यधुरन्धराः सुमनसो नन्दन्तु नित्यश्रियः ॥

Colophon:

इतिश्रीमद्भारद्वाज...... . वरराजार्यतनयेन श्रीनिवासदासेन
विरचिते मरकतवल्लीपरिणयनाटकरत्ने पञ्चमोऽङ्कः ॥

Subject: Marakatavallīpariṇaya 1-5 acts.

Remarks:--The Ms. is in a decaying condition. There are two fragmentary leaves at the end containing a number of verses.

॥ महावीरचरितम् ॥

4433. MAHĀVĪRACARITAM.

Burnell's Catalogue No. 10702. Page 170. Left column. Substance—Palm leaf. Size—15 × 1¼ inches. Leaves —55 (212-266). Lines—5 to a page. Script—Telugu. No. of Granthas—1000. Author—Bhavabhūti. Acts I-V only.

Beginning:

अथ स्वस्थाय देवाय नित्याय हतपाप्मने ।
त्यक्तक्रमविभागाय चैतन्यज्योतिषे नमः ॥

End:

दौरात्म्यादरिमिर्निजार्जवशुचौ मायाविभिर्वञ्चिते
धर्मात्मन्यतिथौ निरागसि जगत्पूज्ये गृहेऽनागते ।
एतस्मिन्नुचितं न नाम विहितं वाचापि नावेदितं
चित्रं जैत्रमहो चरित्रमनुतापेनेव लक्ष्मीजुषा ॥

Colophon:

इति श्रीभवभूतिविरचिते महावीरचरिते पञ्चमोऽङ्कः । हरिः ओं ।

भवभूतिविरचितं महावीरचरितं नाम नाटकं समाप्तम् ॥

श्रीरामचन्द्रायनमः ॥

Subject: Mahāvīracarita 1-5 acts.

Remarks:—The Ms. is in a fairly good condition.

This drama of Bhavabhūti is preserved in an incomplete form only. It is now regarded by almost all that Bhavabhūti did not finish the work. Several writers have composed the last portions comprising Acts VI & VII and completed the work.

The drama deals with the story of the Rāmāyaṇa. The latest edition of the drama in the Punjab University Series by Todar Mall and Prof. Macdonell is noteworthy. For remarks on Bhavabhūti, see No. 4314.

॥ महावीरचरितम् ॥

4434. MAHĀVĪRACARITAM.

Burnell's Catalogue No. 10708. Page 170. Right column.

Substance—Palm leaf. Size—15½ × 1⅜ inches. Sheets—48. Lines—5 to a Page. Script—Telugu. No. of Granthas—1000. Author—Bhavabhūti. Acts I-V only.

Beginning—Same as No. 4483.

End:

दौरात्म्यात् + गृहेऽनागते ॥

एतस्मिन्नुचितं सतामपि हितं वाचापि नावेदितं
हन्त प्रत्युत दारुणं व्यवसितं धिक्सख्यमेवं विधम् ॥

इति महादेवशास्त्रिणा चतुर्थचरणपूरणं कृतम्। सुब्रराम-
कविना तु—

हन्त प्रत्युत दुष्कृतश्च सुमहत्कर्तव्यमुद्वीक्षितम्

इति निष्क्रान्ताः सर्वे ॥

Colophon:

पञ्चमोऽङ्कः ॥

समाप्तमिदं नाटकं महावीरचरितं नाम राजशेखरदग्धशेषम्।

Subject: Mahāvīracarita 1-5 acts.

Remarks:—The Ms. is in good condition.

॥ महावीरचरितम् ॥

4435. MAHĀVĪRACARITAM.

J. L. Collection No. 638. Substance—Paper. Size—9¼ × 4 inches. Sheets—42. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Bhavabhūti. Acts I-V only.

Beginning, end and subject—Same as No. 4433.

Colophon:

इति श्रीवश्यवाचा भवभूतिमहाकविना विरचितं महावीरचरितं नाम नाटकमेतावदेवास्मिन्देशे दृश्यते । शेषन्तु राजशेखरेण दग्धमिति प्रसिद्धिः ॥ अस्य पद्यस्य चतुर्थचरणः महादेवकविना एवं पूरितः ।

हन्त प्रत्युतदारुणं व्यवसितं धिक्सख्यमेवंविधम् ॥

इति महावीरचरितं नाम नाटकम् ॥ श्रीरामःशरणम् ॥

Remarks:—The Ms. is in good condition. This as well Ms. No. 4434 are noteworthy in respect of the remarks contained in the colophon. It is said that Rājaśekhara burnt away the copies of the Mahāvīracarita and that a portion escaped his vandalisam, such portion that has been preserved being Acts 1-V only.

॥ महावीरचरितम् ॥

4436. MAHĀVĪRACARITAM.

Burnell's Catalogue No. 10704. Page 170. Right column. Substance—Palm leaf. Size—$15\frac{3}{4} \times 1\frac{1}{4}$ inches. Leaves—34. Lines—6 to a Page. Script—Grantha. No. of Granthas—600. Author—Bhavabhūti. Incomplete.

Beginning—Same as No. 4433.

End:

दण्डोऽप्यभ्यधिके शत्रौ न प्रकाशः प्रकाशते ।

तूष्णीं दण्डस्तु कर्तव्यः तस्य चायमुपक्रमः ॥

तथा सति सीतापहा........

Colophon:

इति चतुर्थोऽङ्कः ॥

Subject: Mahāvīracarita 1-5 Acts.

Remarks:—The Ms. is in a decaying condition. One side is rat-eaten.

॥ महावीरचरितम् ॥

4437. MAHĀVĪRACARITAM.

Burnell's Catalogue No 10705. Page 170. Right column. Substance—Palm leaf. Size—17 × 1¼ inches. Leaves—18 (218-235). Lines—6 to 8 to a Page. Script—Grantha. No. of Granthas—600. Author—Bhavabhūti. Incomplete.

Beginning—Same as No. 4433.

End:

उत्तिष्ठेत वधाय नः पारिमव + हरिणा वीरेण घातिष्यते ॥

Colophon: (228 Leaf)

इति प्रथमोऽङ्कः ॥

Subject: Mahāvīracarita 1-4 Acts.

Remarks:—The Ms. is in a fairly good condition.

॥ महावीरचरितम् ॥

4438. MAHĀVĪRACARITAM.

J. L. Collection No. 689. Substance—Paper. Size—8 × 5 inches. Sheets—22 (17-38). Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—218. Author—Bhavabhūti. Incomplete.

Beginning:

....रमेश्वरगृहाचारस्य रामः । शोभत एव दशभुवनै-

कदक्षिणस्य सामन्तेष्वहङ्कारोत्प्रासः ॥

End—Same as No. 4438.

Colophon:

इति वश्यवाचा भवभूतिना विरचितं महावीरचरितं नाम नाटकमेता-

वदेवास्मिन् देशे दृश्यते ॥ शेषन्तु राजशेखरेण दग्धमिति प्र-

सिद्धिः ॥ दौरात्म्यादित्येतस्य पद्यस्य चतुर्थचरणः महादेवकविनैवं

पूरितः—

हन्त प्रत्युत दारुणं व्यवसितं धिक्सख्यमेवं विषम् ॥ ४६ ॥

इदं पुस्तकं **घनश्यामस्य**

अज्ञातदोषान्मतिविभ्रमाद्वा

यत्किञ्चिदूनं लिखितं मयात्र ।

तत्सर्वमार्यैः परिशोधनीयं

कोपो न कार्यः खलु लेखकेऽस्य ॥

Subject: Mahāvīracarita 1-5 acts.

Remarks:—The Ms. is in a condition. This Ms. abruptly begins about the end of the second act.

॥ महावीरचरितम् ॥

4439. MAHĀVĪRACARITAM.

Burnell's Catalogue No. 5271. **Page** 170. Left column. **Substance**—Paper. **Size**—10 × 4⅛ inches. **Sheets**—22. **Lines**—7 or 8 to a Page. **Script**—Devanāgarī. No. of **Granthas**—850. **Author**—Bhavabhūti. Incomplete.

Beginning—Same as No. 4438.

End: The Ms. breaks off in the middle of the second act.

Colophon: (14th sheet).

इति प्रथमोऽङ्कः ॥

Subject: Mahāvīracarita 1 & 2 Acts.

Remarks:—The Ms. is in a fairly good condition.

॥ माळविकाग्निमित्रम् ॥

4440. MĀLAVIKĀGNIMITRAM.

Burnell's Catalogue No. 5225. Page 171. Left column. Substance—Paper. Size—10 × 8½ inches. Sheets—60. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Kālidāsa. Complete.

Beginning:

श्रीगणपतये नमः ॥ ॐ नमो मार्तण्डाय ।

एकैश्वर्यस्थितोऽपि प्रणतबहुफले यस्स्वयं कृत्तिवासाः
कान्तासंमिश्रदेहोऽप्यविषयमनसां यः पुरस्ताद्यतीनाम् ।
अष्टाभिर्यस्य कृत्स्नं जगदपि तनुभिर्बिभ्रतो नाभिमानः
सन्मार्गालोकनाय व्यपनयतु स वस्तामसीं वृत्तिमीशः ॥

End:

किमतः परमस्ति । तथापि भवत्वेवं तावत् ।

त्वं मे प्रसादसुमुखी भव चण्डि नित्य-
मेतावदेव मृगये प्रतिपक्षहेतोः ।
आशास्यमित्यधिगमप्रभृति प्रजानां
संपत्स्यते न खलु गोप्तरि नाग्निमित्रे ॥ ८८ ॥

Colophon:

इति निष्क्रान्ता: सर्वे ।

पञ्चमोऽङ्क: ॥ समाप्तोऽयं ग्रन्थ: ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्त:

ओं नमो मार्तण्डाय । संवत् १६५२ वर्षेपोससुदि १४ वर्षे यो सत्रि:पूरणमल | कुरवअतिय भअसो आ आलिंगणवं सणे सु अ० गचलणहूआ

यिलसन्ति कामिणिणंताणं देहि०तिद्दोहदं लयम् ॥

Subject: Mālavikāgnimitra 1-5 acts.

Remarks:—The Ms. is in good condition. On the title page is given:—

'पुस्तकमिदं कगौडि श्रीनाथभट्टस्य'

There are two loose ślokas beginning with

1 प्रेष्यागतं प्रियतमं निरीक्ष्य

2 समैवायं शृङ्गारगर्भिणी (?)

This Ms. is dated saṃvat 1652, corresponding to A. D. 1596. The refernce to Mārtaṇḍa leads us to suppose that the Ms. should have been copied in Northern India.

The Mālavikāgnimitra deals with the story of the marriage of Mālavikā with Agnimitra. Agnimitra had already one wife by name Dhāriṇī and Mālavikā became his second wife.

Agnimitra is regarded as a contemporary of Kālidāsa by certain scholars who place him in the 1st century B. C.

Several editions of this work are available, the most noteworthy being the one published by the Śrī Vāṇī Vilās Press Srirangam. There are a number of copies of this work in this Library and they are given in a tabular form.

Descriptive No.	Collection No.	Substance	Size inches	No. of sheets or leaves
4441	B. L. 5226	Paper.	$11\frac{1}{2} \times 5$	24
4442	,, 5227	do.	$11\frac{3}{4} \times 4\frac{3}{4}$	26
4443	Ms. No 14671	do.	$11\frac{3}{4} \times 4\frac{3}{4}$	25
4444	B. L. No. 10613	Palm leaf.	$17\frac{3}{4} \times 1\frac{3}{8}$	35
4445	,, 10614	do.	$14\frac{1}{2} \times 1\frac{1}{4}$	26
4446	,, 10615	bo.	$18 \times 1\frac{1}{2}$	29
4447	,, 10616	do.	$5\frac{1}{2} \times 1$	102
4448	T. S. 723	Paper.	$10\frac{1}{4} \times 5$	50
4449	J. L. 640	do.	$10 \times 3\frac{3}{4}$	34
4450	,, 641	do.	$9\frac{1}{2} \times 4$	33
4451	,, 642	do.	$9\frac{1}{2} \times 4$	31
4452	,, 643	do.	$10 \times 4\frac{3}{4}$	9
4453	P. A. 360	do.	9×4	8
4454	S. K. 220	do.	$8 \times 3\frac{1}{4}$	22

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
10 to 11	Devanāgarī.	Complete.
10	do.	,,
11	do.	,,
6	Grantha.	,,
9	do.	,,
8	do.	,,
5 or 6	do.	,,
10-12	Devanāgarī.	,,
10	do.	Incomplete (1-5 Acts; wants beginning and end.)
9 or 10	do.	,, (1-5 Acts; wants beginning)
10	do.	,, (1-5 Acts; wants end)
13	do.	,, (1-2 Acts; wants end)
11	do.	,, (1st Act; wants end)
7	do.	,, (1st Act ; wants end)

॥ मालविकाग्निमित्रव्याख्या ॥

4455. MĀLAVIKĀGNIMITRAVYĀKHYĀ.

Burnell's Catalogue No. 10617. Page 171. Left column.

Substance—Palm leaf. Size—16½ × 1½ inches. Leaves—36. Lines—7 to a Page. Script—Grantha. No. of Granthas—950. Author—Kāṭayavemabhūpāla. Complete.

Beginning:

॥ एकैश्वर्येत्यादि ॥ स ईश्वरः परमेश्वरः । सन्मार्गालोकनाय सन् प्रशस्तो मार्गः पन्थाः मोक्षमार्गः तस्यालोकनाय दर्शनाय । युष्माकं तामसीं तमःसम्बन्धिनीं वृत्तिं प्रवृत्तिमपनयतु । अपाकरोतु इति सम्बन्धः ॥

End:

अनेनाशास्यसिद्धिकथनरूपेण शुभशंसनेन प्रशस्तिनाम सन्ध्यङ्गमुक्तम् । प्रजानामाशास्यासिद्धिं प्रति गोप्तुरग्निमित्रस्य कथनं तत्कालराजोपलक्षणमिति मन्तव्यम् । इति परिक्रम्य निष्क्रान्ताः सर्वे ।

Colophon:

इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीये मालविकाग्निमित्रनाटकव्याख्याने पञ्चमोऽङ्कः । मालविकाग्निमित्रनाटकव्याख्यानं समाप्तम् ।

श्रीवेङ्कटेशाय मङ्गलम् ॥

Subject: Mālavikāgnimitravyākhyā 1-5 acts.

Remarks:—The Ms. is in a fairly good condition.

This commentary of Kāṭayavema has been published in

the Nirṇayasāgara Press, Bombay as well as in the Śri Vāṇī Vilās Press, Srīrangam.

॥ मालविकाग्निमित्रव्याख्या ॥

4456. MĀLAVIKĀGNIMITRAVYĀKHYĀ.

Burnell's Catalogue No 10618. Page 171. Left column. Substance - Palm leaf. Size—$17\frac{1}{4} \times 1\frac{1}{2}$ inches. Leaves—30 (94-123). Lines —8 or 9 to a Page. Script—Grantha. No. of Granthas—900. Author—Kāṭayavemabhūpāla Incomplete.

Beginning—Same as No. 4455.

End:

प्रेष्यभावेनेत्यादि । देवीशब्दक्षमा देवीशब्दयोग्या सती इयं मालविका ।

Colophon: (Leaf No. 119.)

इति श्रीकाटय + चतुर्थोऽङ्कः

Subject: Mālavikāgnimitravyākhyā otherwise known as Kumāragirirājīya. 1-5 acts.

Remarks :—The Ms. is in a decaying condition.

॥ मालविकाग्निमित्रव्याख्या ॥

4457. MĀLAVIKĀGNIMITRAVYĀKHYĀ.

Burnell's Catalogue No. 5227. Page 171. Left column. Substance—Paper. Size—$9\frac{3}{4} \times 4\frac{7}{8}$ inches. Sheets—20. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—? Complete.

Beginning:

प्रणम्य गोपीजनवल्लभस्य प्रसादलब्धं चरणारविन्दम् ।
यथामति व्याक्रियते मयेदं सुनाटकं मालविकाग्निमित्रम् ॥

नान्द्यन्ते सूत्रधारः रङ्गं प्रविश्याह ॥ एकैश्वर्ये । अनन्यविषयमेतत् । ईश्वरत्वे कथंभूते प्रणतबहुफले प्रणतानां बहुफलप्रदे ।

End:

उत्तरार्धं भरतवाक्यम् । प्रजानामधिगमप्रभृति राज्यलाभात्प्रभृतीति यावत् । अग्निमित्रे गोप्तरि सति । आशास्यमभिलषितव्यं प्रजानां न न सम्पत्स्यते सम्पत्स्यत एवेति । सर्वकामसमृद्धाः प्रजा इत्यर्थः ॥

Colophon:

इति श्रीमालविकाग्निमित्रनाटकव्याख्याने पञ्चमोऽङ्कः ॥
मालविकाग्निमित्रटीका सम्पूर्णा ॥

Subject: Mālavikāgnimitraṭīkā 1-5 acts.

Remarks:—The Ms. is in good condition. The author of this commentary is unknown.

॥ मालविकाग्निमित्रव्याख्या ॥

4458. MĀLAVIKĀGNIMITRAVYĀKHYĀ.

Burnell's Catalogue No. 10619. **Page 171. Left column.**

Substance—Palm leaf. Size—18×1½ inches. Leaves—16 (30-45). Lines—8 to a Page. Script—Grantha. No. of Granthas—500. Author—?. Complete.

Beginning, end and subject—Same as No. 4457.

Colophon:

पञ्चमोऽङ्कः ।

शेषाद्रि स्वहस्तेन श्रीमदादिकुम्भेश्वरकृपया मालविकाग्निमित्रटीका सम्पूर्णा लिखिता।

Remarks:—The Ms. is in very good condition.

॥ मालविकाग्निमित्रव्याख्या ॥

4459. MĀLAVIKĀGNIMITRAVYĀKHYĀ.

Burnell's Catalogue No. 10620. Page 171. Left column. Substance—Palm leaf. Size—17⅜ × 1⅜ inches. Leaves —17 (31-47). Lines—5 or 6 to a Page. Script—Telugu. No. of Granthas—500. Author—?. Complete.

Beginning, end, colophon and subject—Same as No. 4457.

Remarks:—The Ms. is in a fairly good condition. The last leaf is broken.

॥ मुक्तिपरिणयम् ॥

4460. MUKTIPARIṆAYAM.

Burnell's Catalogue No. 5243. Page 171. Left column. Substance—Paper. Size—10½ × 4½ inches. Sheets—19. Lines—18 to a Page. Script—Devanāgarī. No. of Granthas—770. Author—Sundaradeva. Incomplete.

Beginning:

श्रीगणेशाय नमः ॥

गङ्गाम्भोऽर्धप्रतिकृतिः पूर्णेन्दुनिटिलो विभुः ।
तारकः ज्ञानदः काश्यां शिवः सन्दिशतु श्रियम् ॥

* * *

॥ नान्द्यन्ते सूत्रधारः ॥

सू ॥ अलमतिप्रस्तुतेन ।

* * *

तत् काश्यपगोत्रपवित्रस्य तत्रभवतः काशीजन्मभूमेः भिषगभिमतस्य गोविन्ददेवसूनोः सुन्दरदेवस्य मुक्तिपरिणयं नाम नाटकं नाटयितव्यम् । यो हि

बहुखलकलिवृन्दैराहतः शान्तिमाप्तः
कथमपि सहजैस्तैः कामलोभाद्यमित्रैः ।
हृदि बहुविधचिन्ताक्रान्तसारेऽमृतार्तिं
कलयति कवितायाः सुन्दरश्लेषणेन ॥

End:

सदाशिवः ॥ (समन्तादवलोक्य सहासम् ।)
अरे रे पिशाचमते तिष्ठ तिष्ठ ।

क्षिप्त्वा प्रेतयुगं रुषा तव शिरः प्रोन्मोद्य कण्ठे दृढं
कोष्णप्रस्रवदस्रकेन निबिडेनान्तां भजे चाण्डिकाम् ।
नृत्यत्प्रेतपिशाचराक्षसगणो घोरे श्मशानो....

Colophon: (Sheet No. 14)

इति सुन्दरदेवकृतौ मुक्तिपरिणये नाटके तृतीयोऽङ्कः ॥

Subject: Muktipariṇaya 1-4 acts.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends towards the close of the 4th act.

Muktipariṇaya is an allegorical drama by Sundradeva of Kāśyapagotra. He was a native of Benares. The work deals with the pre-eminence of the advaitic conception of mukti or final liberation from this Saṃsāra.

The work has not been printed by anybody so far.

॥ मुद्राराक्षसम् ॥

4461. MUDRĀRĀKṢASAM.

Burnell's Catalogue No. 5159. Page 171. Left column.

Substance—Paper. Size—$10\frac{1}{8} \times 4\frac{3}{4}$ inches Sheets—64. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Viśākhadatta. Complete.

Beginning:

धन्या केयं स्थिता ते शिरसि शशिकला किन्नु नामैतदस्या
नामैवास्यास्तदेतत्परिचितमपि ते विस्मृतं कस्य हेतोः ।
नारीं पृच्छामि नेन्दुं कथयतु विजया न प्रमाणं यदीन्दु-
र्देव्या निह्नोतुमिच्छोरिति सुरसरितं शाठ्यमव्याद्विभोर्वः ॥

End:

वाराहीमात्मयोनेस्तनुमवनविधौ वाञ्छितस्यानुरूपां
यस्यप्राक्प्राप्य कोऽपि प्रलयपरिणता शिश्रिये भूतधात्री ।
म्लेच्छैरुद्वेज्यमाना भुजयुगमधुना संश्रिता राजमूर्तेः
स श्रीमद्बन्धुभृत्यश्चिरमवतु महीं पार्थिवश्चन्द्रगुप्तः ॥

Colophon:

इति श्रीकविविशाखदेवदत्तविरचिते मुद्राराक्षसाभिधाने नाटके
सप्तमोऽङ्कः समाप्तश्चेदं नाटकम् ।

Substance—Paper. Size—13¾ × 6 inches. Sheets—61. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1500. Author—Viśākhadatta. Complete.

Beginning, end and subject—Same as No. 4461.

Colophon:

सप्तमोऽङ्कः ॥

समाप्तमिदं नाटकम् ।

श्रीमुखाश्वयुजे मासे चतुर्दश्यां कवेर्दिने ।

कृष्णाभिधोऽलिखन्मुद्राराक्षसं नाम नाटकम् ॥

Remarks:—The Ms is in excellent condition. Alternate sheets are sulpherated.

॥ मुद्राराक्षसम् ॥

4466. MUDRĀRĀKṢASAM.

Burnell's Catalogue No. 10578. Page 171. Left column. Substance—Palm leaf. Size—18½ × 1⅜ inches. Leaves—60. Lines—6 to a Page. Script—Telugu. No. of Granthas—1400. Author—Viśākhadatta. Complete.

Beginning, end, colophon and subject—Same as No. 4461.

Remarks:—The Ms. is in a fairly good condition.

॥ मुद्राराक्षसम् ॥

4467. MUDRĀRĀKṢASAM.

Burnell's Catalogue No. 5163. Page 171. Left column. Substance—Paper. Size—12 × 4¾ inches. Sheets—75.

Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Viśākhadatta. Complete.

Beginning, end, colophon and subject—Same as No. 4461.

Remarks:—The Ms. is in a fairly good condition.

The last verse alone of Ḍhuṇḍirāja's commentery is given in this Ms. additionally.

॥ मुद्राराक्षसम् ॥

4468. MUDRĀRĀKṢASAM.

T. S. Collection No. 724. Substance—Paper. Size—9½×8¾ inches. Sheets—66 (7—87 out of which 27, 55—66 wanting). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Viśākhadatta. Incomplete. (Wants beginning).

Beginning:

प्रधानप्रकृतिष्वस्मास्वारोपितराज्यतन्त्रभारः सततमु-

दास्ते । अथवा ।

End and subject—Same as No. 4461.

Colophon:

इति सप्तमोऽङ्कः ।

विकारिनामसंवत्सरफाल्गुनवद्य पञ्चमी वेंकटेशभट्टपौराणिकेन समाप्तः ॥

Remarks:—The Ms. is in a good condition.

॥ मुद्राराक्षसम् ॥

4469. MUDRĀRĀKṢASAM.

T. S. Collection No. 725. Substance—Paper. Size—9½×4

inches. Sheets—34. Lines —12 to a Page. Script—Devanāgarī. No. of Granthas—1000. Author—Viśākhadatta. Incomplete.

Beginning—Same as No. 4461.

End:

मलयकेतुः ॥ विजय, शकटदासं द्रष्टुमिच्छामि ॥

प्रतिहारी ॥ जं कुमारो आणवेदि ॥

Colophon: (Sheet No. 30)

चतुर्थोऽङ्कः

Subject: Mudrārākṣasa 1-5 acts.

Remarks:—The Ms. is in a fairly good condition.

॥ मुद्राराक्षसम् ॥

4470. MUDRĀRĀKṢASAM.

Burnell's Catalogue No. 5165. Page 171. Left column. Substance—Paper. Size—8¾ × 3½ inches. Sheets—22. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—380. Author—Viśākhadatta. Incomplete.

Beginning—Same as No. 4461.

End:

शकटदासः । यदाज्ञापयत्यमात्यः । (मुद्रां विलोक्य जनान्तिकम्) । अमात्य त्वन्नामाङ्कितेयं मुद्रा ॥

राक्षसः । (विलोक्यात्मगतम्) ॥

Colophon:

इति प्रथमोऽङ्कः ॥

Subject: Mudrārākṣasa I & II acts.

Remarks:—The Ms. is in a fairly good condition.

॥ मुद्राराक्षसम् ॥

4471. MUDRĀRĀKṢASAM.

Burnell's Catalogue No. 5166. Page 171. Left column.

Substance—Paper. Size—$6\frac{7}{8} \times 4\frac{1}{3}$ inches. Sheets—14. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas- 100. Author—Viśākhadatta. Incomplete.

Beginning: —Same as No. 4461.

End:

तद्यथा ।

कौलूतश्चित्रवर्मा मलय नरपतिः सिंहनादो

. . . .

Subject: Mudrārākṣasa I Act.

Remarks:—The Ms. is in a fairly good condition. On the title page is given

'मुद्राराक्षसनाटकं तुलजाराजस्य पुस्तकम्'

॥ मुद्राराक्षसम् ॥

4472. MUDRĀRĀKṢASAM.

Burnell's Catalogue No. 5164. Page 171. Left column.

Substance—Paper. **Size**—$11\frac{3}{8} \times 4\frac{7}{8}$ **inches**. Sheets—34. Lines—9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—650. Author—Viśākhadatta. Complete.

Beginning—Same as No. 4461.

End:

॥ २ ॥ अअं आअतो अवेह माणवाः । हा किं ण पेक्खथ

पेल्लवथ । दूलेपच्चासतीदं दंसणमदिदुल्लहं

Colophon: (Sheet No. 33)

इति तृतीयोऽङ्कः ॥

Subject: Mudrārākṣasa 1-4 acts.

Remarks:—The Ms. is in good condition.

॥ मुद्राराक्षसच्छाया ॥

4473. MUDRĀRĀKṢASACCHĀYĀ.

Burnell's Catalogue No. 5170. Page 171. Left column. Substance—Paper. Size—$8\frac{1}{4} \times 4\frac{3}{4}$ inches. Sheets—18. Lines—9 to 10 to a Page. Script—Devanāgarī. No. of Granthas—350. Author—Śarabhabhūpa. Complete.

Beginning:

प्रणम्य पार्वतीनाथं शरीफनृपतिः शुभाम् ।

छायाञ्चरीकर्ति मुद्राराक्षसस्य सतां मुदे ॥

आर्य इयमस्मि । आज्ञानियोगेन मामार्योऽनुगृह्णातु ॥

End:

एवं श्रुत्वार्यः प्रमाणम् । यदेव आज्ञापयति ॥

Colophon:

इति श्रीभोसलतिलकेन शरफनृपालेन विरचिता

मुद्राराक्षसनाटकस्य छाया सम्पूर्णा ॥

Subject: Mudrārākṣasacchāyā.

Remarks:—The Ms. is in good condition.

This work gives the chāyā for the Prākṛt passages found

in the text of the Mudrārākṣasa. The author is Serfojee II (1800-1832) king of Tanjore.

॥ मुद्राराक्षसच्छाया ॥

4474. MUDRĀRĀKṢASACCHĀYĀ.

Burnell's Catalogue No. 10579. Page 171. Left column. Substance—Palm leaf. Size—$13\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—14. Lines—7 to a Page. Script—Telugu. No. of Granthas—350. Author—Śarabhabhūpa. Complete.

Beginning, end, colophon and subject—Same as No. 4473.

Remarks:—The Ms. is in good condition.

॥ मुद्राराक्षसव्याख्या ॥

4475. MUDRĀRĀKṢASAVYĀKHYĀ.

Burnell's Catalogue No. 5313. Page 171. Right column. **Substance**—Paper. Size—14×6 **inches**. Sheets—52. Lines—10 to a **Page**. Script—Devanāgarī. No. of Granthas—2700. Author—Ḍhuṇḍhirājavyāsayajvan. Complete.

Beginning:

सिन्दूरारुणगण्डमण्डलमदामोदभ्रमद्भृङ्गिका-
झङ्कारेण कलेन कर्णमुरजध्वानेन मन्द्रेण च ।
तत्तौर्यत्रिकरीतिमेति शिरसः शश्वन्मदान्दोलनं
यस्य श्रीगणनायकः स दिशतु श्रेयांसि भूयांसि वः ॥ १ ॥

End:

गङ्गास्तुतौ च ।

भगवत्पादैरनयोरभेदभक्तिप्रार्थना कृता ।
भूयात्भक्तिरविच्युता हरिहराद्वैतात्मिका शाश्वती ॥

Colophon:

इति श्रीमद्यम्बकयज्वप्रभुवर्याश्रितेन दुण्ढिराजव्यासयज्वना विरचिते
मुद्राराक्षसनाटकव्याख्याने सप्तमोऽङ्कः ॥
समाप्तमिदं नाटकम्
बुधो दुण्ढिर्नाम्ना जगति विदितो + मुदे नाटकमिदम्

* * *

बाणाग्निऋतुमहीसङ्ख्यामितेऽब्दे जयनामके ।
दुण्ढिना व्याकृतं जीयान्मुद्राराक्षसनाटकम् ॥ २ ॥
श्रीमुखे कार्तिके शुक्लदशम्यां सौम्यवासरे ।
नारायणेन लिखिता मुद्राराक्षसटीकिका ॥ ३ ॥
॥ १६३५ ॥
श्रीचन्द्रमौलीश्वरार्पणमस्तु

Subject: Mudrārākṣasavyākhyā. 1-7 acts.

Remarks:—The Ms. is in excellent condition.

Ḍhuṇḍhirāja, the author of this commentary seems to have been a resident of Svāmimalai in the Tanjore District. He was a contemporary of Śāhaji and Serfoji I. The work was composed in Śaka 1635 or A. D. 1713. This has been published in the Bombay Sanskrit Series.

॥ मुद्राराक्षसव्याख्या ॥

4476. MUDRĀRĀKṢASAVYĀKHYĀ.

Burnell's Catalogue No. 5167. Page 171. Left column.

Substance—Paper. Size—12×5 inches. Sheets—117. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—2700. Author—Ḍhuṇḍhirājavyāsayajvan. Complete.

Beginning, end and subject—Same as No 4475.

Colophon:

जयसंवत्सरे फाल्गुने मासि विरचितमिदं मुद्राराक्षसनाटकव्याख्यानं जीयादित्यर्थ. ।

Remarks:—The Ms. is in good condition.

॥ मुद्राराक्षसव्याख्या ॥

4477. MUDRĀRĀKṢASAVYĀKHYĀ.

Burnell's Catalogue No. 5168. Page 171. Left column.

Substance—Paper. Size—10¾×4½ inches. Sheets—159. Lines—8 to 15 to a Page. Script—Devanāgarī. No. of Granthas—2700 Author—Ḍhuṇḍhirājavyāsayajvan. Complete.

Beginning, end, colophon and subject—Same as No. 4475.

Remarks:—The Ms: is in a fairly good condition. After the colophon is given

कर्माख्यः सूत्रधारो बहुविधजननीगर्भनेपथ्यमध्या
 च्छ्रिःसार्यांशेषवेषे शिव तव पुरतो नैकधा नर्तयन्माम् ।
हन्त श्रान्तोऽस्मि नृत्यादुपरतिमधुना याहि मूढेति मह्यं
 वाक्यात्रं पारितोषं दिशसि यदि विभो तावता स्यां कृतार्थः ॥

॥ मुद्राराक्षसव्याख्या ॥

4478. MUDRĀRĀKṢASAVYĀKHYĀ.

J. L. Collection No. 644. Substance—Paper. Size—13×5

inches. Sheets—37 (2–38). Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Ḍhuṇḍhirāja Incomplete. Wants beginning.

Beginning:

........रूपमुद्राख्यकं बोद्धव्यम् । अत्र रक्षस्त्वेनं तु वुधयोग इति "स्वेतिवृत्तसमं वाक्यमर्थे वा यत्र सूत्रिणः ।" इति लक्षणात् ॥

End, colophon and subject—Same as No. 4475.

Remarks:—The Ms. is in a fairly good condition.

॥ मुद्राराक्षसव्याख्या ॥

4479. MUDRĀRĀKṢASAVYĀKHYĀ.

T. S. Collection No. 726. Substance—Paper. Size—7¾ × 5 inches. Sheets—57. Lines—10 to 12 to a Page. Script—Devanāgarī. No. of Granthas—900. Author—Ḍhuṇḍhirāja. Incomplete. (First act only.)

Beginning and subject—Same as No. 4475.

End:

इत्थं पताविन्दुसंबन्धरूपः प्रतिमुखसन्धिः । बिन्दुप्रयत्नानुगुण्येनास्य संधेः त्रयोदशाप्यङ्गानि च यथामति योजितानीति सूक्ष्मदर्शिभिरवधाय सन्तोष्टव्यम् ॥

॥ इति निष्क्रान्ताः सर्वे ॥

Colophon:

प्रथमोऽङ्कः ॥

इति श्रीत्र्यम्बक + प्रथमोऽङ्कः

Remarks:—The Ms. is in a fairly good condition.

॥ मुद्राराक्षसव्याख्या ॥

4480. MUDRĀRĀKṢASAVYĀKHYĀ.

Burnell's Catalogue No. 5169. Page 171. Right column. Substance—Paper. Size—8½ × 5 inches. Sheets—42. Lines—14 or 15 to a Page. Script—Devanāgarī. No. of Granthas—420. Author—Ḍhuṇḍhirājavyāsayajvan. Incomplete.

Beginning—Same as No. 4475.

End: Ends with the end of the second act.

Subject: Mudrārākṣasavyākhyā. First two acts only.

Remarks:—The Ms. is in a fairly good condition. Text also is given herein.

The first verse found in No. 4475 is missing herein.

॥ मुद्राराक्षसव्याख्या ॥

4481. MUDRĀRĀKṢASAVYĀKHYĀ.

T. S. Collection No. 728. Substance—Paper. Size—7¾ × 5 inches. Sheets—29. Lines—12 to 13 to a page. Script—Devanāgarī. No. of Granthas—275. Author—Ḍhuṇḍhivyāsa. Incomplete.

Beginning:

भट्टमटपुरीमदन्तर्डिगरातवलउत्तराअमेण भाउराअण-
रोहितस्सवविजयवम्मप्पमुहेहिं संजमीअ गहीदोमलय-
केदू ॥

End and colophon—Same Nos. as 4475 and 4476.

Subject: Mudrārākṣasavyākhyā. 7 acts.

Remarks:—The Ms. is in a fairly good condition.

॥ मुद्राराक्षसव्याख्या ॥

4482. MUDRĀRĀKṢASAVYĀKHYĀ.

T. S. Collection No. 727. **Substance**—Paper. **Size**—7⅘ × 5 inches. Sheets—22. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Ḍhuṇḍhirāja. Incomplete.

Beginning:

अथ फलागमकार्ययोः सम्बन्धो निर्वहणसन्धिः त्रिभिरङ्गैरारभ्यते ।

End:

कञ्चुकी । (आत्म) । कथं निरुपपदमेव चाणक्यमिति । नार्यचाणक्यमिति । कथं सङ्गृहीतोऽधिकारः । अथवा न खल्वत्र वस्तुनि दैवेदोषः ॥

Subject: Mudrārākṣasavyākhyā.

Remarks:—The Ms. is in a fairly good condition.

॥ मुद्राराक्षसव्याख्या ॥

4483. MUDRĀRĀKṢASAVYĀKHYĀ.

J. L. Collection No. 645 Substance—**Paper**. **Size**—10 × 8¾ **inches**. Sheets—9. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—200. Author—? Incomplete.

Beginning:

श्रीमद्विशाखदत्तीये मुद्राराक्षसनाटके ।

कथोपोद्घातमाचक्षे संविधानावबुद्धये ॥

End:

जातवेदा इवार्चिष्मान् वेदान् वेदविदां वरः ।
योऽधीतवान् स चतुरः चतुरोऽप्येकदेशवत् ॥

Colophon: Nil.

Subject: Mudrārākṣasavyākhyā Upodghāta only.

Remarks:—The Ms. is in a fairly good condition.

Is this work by Ghanaśyāma ?

॥ मुद्राराक्षसव्याख्या ॥

4484. MUDRĀRĀKṢASAVYĀKHYĀ.

T. S. Collection No. 737 a. Substance—Paper. Size—7½ × 5 inches. Sheets—18. Lines—11 to 12 to a Page. Script—Devanāgarī. No. of Granthas—270. Author—? Incomplete.

Beginning:

अथ राक्षसकृतोपायवृत्तान्तकथनाय प्राप्त्याशापताकासम्बन्धरूपो गर्भसन्धिः द्वितीयेनाङ्केनारभ्यते ॥

End:

अम-च । स एव्व भण्डाआरे ठाविदुं जदो ॥

Subject. Mudrārākṣasavyākhyā Second act.

Remarks:—The Ms. is in a fairly good condition.

॥ मुद्राराक्षसव्याख्या ॥

4485. MUDRĀRĀKṢASAVYĀKHYĀ.

T. S. Collection No. 737 b. Substance—Paper. Size—7½ × 5

inches. Sheets—6-14. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—150. Author—? Incomplete.

Beginning:

करीअदि ॥ आकाशलक्षणं पूर्वमुक्तम् ॥
आर्याः किं भणथ । किंमिमिसं अपसा रणा क्रियत
इति ॥

End:

अत एव मन्दधीरिति विशेषण....समासः ।
तस्मात्सचिवादपक्र.... ।

Remarks:—The Ms. is in a fairly good condition.

॥ यतिराजविजयम् ॥

4486. YATIRĀJAVIJAYAM.

Burnell's Catalogue No. 10698. Page 171. Right column. Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{5}$ inches. Leaves—88. Lines—5 to a Page. Script—Grantha. No. of Granthas—1500. Author—Varadācārya or Varadarāja. Complete.

Beginning:

हरिः ॐ । यतिराजविजयम् ॥

पद्मे त्वम्बयने स्मरामि सततं भावो भवत्कुन्तले
नीले मुह्यति किं करोमि महितैः क्रीतोऽस्मि ते विभ्रमैः ॥
इत्युत्स्वप्नवचो निशम्य स रुषा निर्भर्त्सितो राधया
कृष्णस्तत्परमेव तथ्यपदिशन् क्रीडाविदः(टः) पातु नः ॥ १ ॥

(नान्द्यन्ते)

सूत्रधारः ॥

*   *

अस्ति खलु समस्तकलास्वद्वितीयो द्वितीयो मे देहः । (नेपथ्याभिमुखमवलोक्य) मारिष, परिषदि पौरुषं ते किं न दर्शयसि ।

*   *   *   *

सूत्रधारः— संप्रति समयसमयस्य *

कावेरीमध्यमरतकमणिभूषणस्य, विभीषणाराधितपादपङ्कजस्य, भुजङ्गराजभोगपर्यङ्कशायिनः, श्रीरङ्गराजस्य चैत्रोत्सवयात्रा(या)मात्मविद्याविदग्धैरन[त]रघभरतविद्याविनोदैरार्यमिश्रैरादिष्टोस्मि ॥ यदुत अस्ति खलु भगवद्रामानुजमुनेः पूर्वाश्रमभागिनेयः श्रीवत्सकुलचूडामणिः अखिलपरदर्शनमदकर्शनः सुदर्शनो नाम । *

तस्य वेदान्तकूटस्थः पौत्रोऽभूद्वरदो गुरुः ।
श्रुतप्रकाशिकाद्याश्च ग्रन्था यच्छिष्यसंपदः ॥

तस्य पञ्चमः प्रपंचविर्दुषे (विद्वद्वि)दितवैदुष्यः काञ्चीपुरवास्तव्यः श्रीघटिकाशतक(वि)सुदर्शनाचार्यसूनुः श्रीवेदान्ताचार्यरामानुजस्थापनाचार्ययोः प्रसादभूमिः वरदराजो नाम कविः । तद्विरचित-

वेदान्तविलासं नाम नाटकमस्माकं श्रोत्रपदवीमा(मन)
दयति । तेन नेत्रपदवीमप्यानन्दयस्वेति ।

पारि ॥ (विचिन्त्य) तदभिनेतव्यमित्युक्तम् ।
भवतु नाम । किन्नाम नाटकस्य ।

सूत्र ॥ विमृश्य,

चित्रकूटतटे रामश्चित्रपा(धा)रौ चकार यत् ।
सीताललाटे तन्नाम स्वरसं सिद्धमेव तत् ॥

नटः ॥ (विचार्य सहर्षं) ललाटे कृतं हरितालतिलक-
मेव । तस्य स्वैर्यातिराजाविजयामिति संसिद्धमेव
तन्नाम ।

सूत्र ॥ साधु सम्यक्प्राज्ञोऽसि ।

सूत्र ॥ (श्रुत्वा सहर्षं) अहमप्यमुना संभूय तदनुस-
न्धास्यामीति निष्क्रान्तः ॥

प्रस्तावना ॥

End:

तथापीदमस्तु भरतवचनम् ।—

काले वर्षतु वासवः क्षितिभुजो रक्षन्तु सम्यङ्महीं
सर्वे सन्तु निरामयाश्च कृतिनः सत्वेराः(सत्वोचराः)
प्राणिनः ।

पुण्या लोकमिमं पुनातु भगवद्भक्तिश्चिरस्थायिनी
मालावधतिशेखरस्य विहरत्वाज्ञा नृणां मूर्धसु ॥

इति हर्षं नाटयन्तो निष्क्रान्ताः सर्वे ।

नीतो मयाद्य निगमान्तमदद्विपोऽयं
रंगस्थलं रचितनाटकसंविधानम् ।
नित्यं निरङ्कुशगतिर्निजसूत्रमार्गे
किंचिद्यदि स्खलति सह्यमिदं सदस्यैः ॥


श्रीघटिकाशतकश्रीमद्वरदाचार्यविरचिते वेदान्तविलासापर-नाम्नि यतिराजविजये षष्ठोऽङ्कः ॥

श्रीमते रामानुजाय नमः । श्रीगुरुभ्यो नमः । शुभमस्तु ॥

Subject: Yatirājavijayanāṭakam also called Vedāntavilāsa-nāṭakam. 1-6 acts. Complete.

Remarks :— The Ms. is in a fairly good condition, and much worm-eaten.

This drama, Yatirājavijaya, otherwise called Vedāntavilāsa was composed by Varadarājakavi who was a native of Kāñcīpura. The following particulars can be gathered of the ancestry of the author;—



The last Varadācārya is the author of present work.

The work deals with the life story of Rāmānujācārya the founder of the modern school of Viśiṣṭādvaita. The work is not available in print.

॥ रघुनाथविलासम् ॥

4487. RAGHUNĀTHAVILĀSAM.

Burnell's Catalogue No. 5240. Page 171. Right column.

Substance—Paper. Size—$10\frac{1}{4} \times 4\frac{3}{8}$ inches. Sheets—79. Lines—9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—1600. Author—Yajñanārāyaṇadīkṣita. Complete.

Beginning :

श्रीगणेशायनमः ॥

देवीं यो लभतेऽस्म वारिधिभवां दिव्यश्च यो वा मणिं

ग्राहं सा ग्रहमञ्जसा ग्रहकृते भित्वा च सत्वाधिकम् ।

यः सारङ्गमरक्षदक्षककृपाव्यापारतस्तादृशो

राजत्यम्बुजलोचनो भुवभवत्रङ्गस्थलाभ्यन्तरे ॥ १ ॥

❋ ❋ ❋

(नान्द्यन्ते)

सूत्रधारः ॥ (परिक्रम्यावलोक्य च ।) (सहर्षम्)

कवनरससुधायाः कापि पानीयशाला

बुधविविधकलानां बोधिका पूर्वसन्ध्या ।

अभिनयविभवानामास्तिकी जीवनाडी

जयति परिषदेषा जन्मभूमिर्गुणानाम् ॥

(पुनर्निरूप्य)

अस्याङ्किल निखिलशैलूषतपस्याङ्कुरितसान्दिष्टिकबुध-

समष्टिसमधिष्ठितायां युधिष्ठिरपुरुकुत्सनहुषनैषधमरुतमरुत्तनयययातिभरतभगीरथपरिक्षित्प्रमुखमहीक्षित्प्रभावपरिभावकबाहार्गल * * सङ्गीतसाहित्यभङ्गीसौहित्यनिर्माणकर्मान्तिकप्रबन्धशतनिबन्धनामन्दधौरन्धर्यधिषणासनाथो रघुनाथजनाधिनाथो मणिधोरणीरचितद्युमणिघृणिगर्वमुद्रासनमधिवसति भद्रासनम् ॥

* * *

नाट्याचार्यः ॥ सखे नटकेसरिन् राजाभिमतं सम्यगूहितं भवता ॥ तच्च रघुनाथविलासं नाम नवनवरसोद्घाटकं नाटकम् ॥

नटः ॥ आर्य नाट्याचार्य नाम्नैव तस्य नायकः सकलकलाकलापकुशलरघुनाथनरपालोऽयमित्यूह्यते । तस्य तादृशः को वा कवयिता ॥

नाट्याचार्यः ॥ (अङ्गुल्या निर्दिशन्) ।

अस्य श्रीरघुनाथभूवलरिपोरध्यासितार्धासनः
प्रज्ञावैभवखण्डितप्रतिवदत्पाषण्डषण्डस्मयः ।
कुर्वन्व्याक्रिययातिविश्रुततरं कौमारिलं दर्शनं
गोप्ता नित्यगवीरसौ विजयते गोविन्दयज्वाग्रणीः ॥

* * *

चत्वारः कृतसर्वतोमुखमहासत्रेण गाढं शिलायूपा येन निखानिताः प्रतिदिशं युक्तं चिरावस्थितेः ।
सौराज्यं रघुनाथभूमिपतिना सम्प्रेषिते क्ष्मातले
पारे सह्यसुतं वृषेण वसता पादा इव स्थापिताः ॥

* * *

नटः ॥ समश्रोषि च पुरा त्रैस्रोतसप्रवाहपवित्रितायां तस्यां वाराणस्यां वसतामेव सतां प्रत्याह । तत्कृतहिरण्यगर्भतुलापुरुषादिमहादानप्रतिग्रहनिरर्गलविभवागमानुदिवसप्रशंसनादाप्तवाजपेयनाम्नि सप्ततन्तुवरे निरन्तरे क्षणकुतूहलिना रघुनाथभूतलवलद्विषा सहस्रेष्टकाचितश्येनचयनस्य प्रतीष्टकमश्वत्थैव सकलाध्वरक्रमविधे विध्युक्ता दक्षिणा दापितेति ॥

* * *

तत्रभवता रघुनाथभूभुता शिक्षित इत्यनेनैव तावदस्यापि कवयिता यज्ञनारायणयायजूक इति जानामि, यो वा रघुनाथभूविजयसाहित्यरत्नाकरयोः काव्ययोः कर्ता

* * *

ना ॥ प्रागेव वर्णिता सा वक्रद्वद(?)विद्वदवतंसायितवचसा

विधुतालङ्कारिकविबुधाहङ्कारेण कृष्णयज्वना ॥

तथाहि ॥

द्राक्षामद्राक्षमिक्षुद्रवमपिबमपां क्षौद्रमक्षुद्रमाद

मोचामाचाममुच्चैः क्वथितमदपयःशर्करामप्यचर्वम् ।

तानि श्रीयज्ञनारायणमखिवरवाङ्मौखरीवैखरीभि-

र्गायन्ते यातयामान्यमृतमविषयो नन्दितुं निन्दितुं वा ॥

॥ किञ्च ॥

डिण्डिमकुलमण्डनेन पण्डितशिखामणिना सोमनाथेन ॥ तथा हि ॥

अमृतमृगमदादीन्याद्रियन्तां वरकाः
कतिचन करणानां शर्म निर्मातुकामाः ।
अपि तु वयमपारां यज्ञनारायणोक्त्या
निखिलकरणनाडीनिर्वृतिं कल्पयामः ॥

नटः ॥ अस्ति श्रूयते ॥

नाट्याचार्यः ॥ सखे नटकेसरिन्नत्याश्चर्यकारी खलु बुद्धिमत्ता भवतः । यदहं वासिष्ठकुलसौष्ठवकृते कृतावतारं गोविन्दमखीन्द्रं निर्दिश्य तस्य तनुजोऽयमिति पार्श्ववर्तिनमेनं कवीन्द्रं यावन्न निर्दिशामि ततः प्रागेव देशान्तरेषु तत्प्रसिद्धिमाकर्णितवता भवता प्रकृते विविक्तमनुक्त एवायं यज्ञनारायणयायजूकाविज्ञकुलशेखरः पादाङ्गदादिनृपसाधारणभूषणविभूषितः सदसि स एवायमिति प्रत्यभिज्ञाता कवयिता

* * *

कुत्रापि नाटकस्य कर्ता नायकोऽप्युभावेकसभावस्थितौ मयेत्थमभिनयसमये न दृष्टचराविति विस्मयातिशयेन विस्मृतवानस्मि ॥

End:

प्रति ॥ (नायिकया तत्रासाभरणं धारयन्ती ।) वत्स विजयकेतो किन्ते भूयः प्रियमुपहरामि ॥ किमतः परमपि प्रियमास्ति ॥ तथापीदमस्तु भरतवाक्यम्

आचन्द्रतारकमसाववनीमशेषा-

मम्भोनिधानरशनामवदातकीर्तिः ।

रत्नाङ्गदेन सदृशं रघुनाथभूमी-

जानिर्वहन् भुजतरे जयतु प्रहृष्टः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति पदवाक्यप्रमाणपारावारपारीणश्रीमदद्वैतविद्याचार्यसाग्निचित्यसर्व-
तोमुखातिरात्रसाग्निचित्यामवाजपेययाजी गोविन्ददीक्षितवरनन्दनस्य
श्रीयज्ञनारायणयज्वनः कृतिषु रघुनाथविलासनाम्नि नाटके
पञ्चमोऽङ्कः ।

Subject: Raghunāthavilāsa 1-5 acts.

Remarks:—The Ms. is in a good condition.

Yajñanārāyaṇa Dīkṣita, the author of the present drama is already known to us as the author of the Sāhityaratnākara. (See No. 4221). The Raghunātha Vilāsa was composed by him in honour of his patron Raghunātha Nāyaka, King of Tanjore who was ruling in the beginning of the 17th century.

The work is not available in print.

॥ रतिमन्मथम् ॥

4488. RATIMANMATHAM.

J. L. Collection No. 646. Substance—Paper. Size—6 × 4¼ inches. Sheets—90. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—1100. Author—Jagannātha. Complete.

Beginning:

साकूताः शशिशेखरे सुरसरित्याविष्कृतानादराः

स्मेरा भृङ्गिरिटावनन्यशरणे दीने दयामेदुराः ।

वात्सल्यप्रचुराः प्रसूनविशिखे रत्यां प्रसादोत्तराः

कल्याणानि तरङ्गयन्तु जगतां मातुः कटाक्षाङ्कुराः ॥

॥ नान्द्यन्ते सूत्रधारः ॥

(नेपथ्याभिमुखमवलोक्य) आर्ये सन्निधेहि तावत्

(प्रविश्य नटी ॥)

नटी ॥ अय्य एसं हि णिओअणिज्जा ।

सूत्र ॥ आर्ये नन्वस्यास्तञ्जनगरकंजातकलहंससुदृशो भावुकजनभावुकवितरणकल्पवल्ल्यास्त्रिलोकमातुरा - नन्दवल्ल्यास्तावद्वसन्तोत्सवे ससन्तोषमशेषदिग- न्तोपसेदुषाममीषां रसिकविदुषामनुरञ्जनानुरूपं कि- मिव रूपकमिति निरूपयतोऽपि चिराय न विश्राम्य- ति मे चेतः ॥

* * *

सू ॥ आर्ये शृणु तावत् ।

शब्दाडम्बरसस्पृहाः कतिपये केऽप्यर्थचित्रैषिणः

केचित्तद्वितयोत्सुकाः वशयितुं शक्याः प्रवाचा ह्यमी ।

यत्तावद्रसिका रसोत्तरगुणग्रामाभिरामां परं

श्लाघन्ते फणितिं भवेन्न सुकरं तेषां समाराधनम् ॥

॥ किञ्च ॥

नवनवसुहृग्विलासैर्नन्नूत्सुकाः कामिनो यथानुदिनम् ।
एवमपूर्वासु (कृति)ष्वादरवन्तो हि रसयितारः ॥ ३ ॥

* * *

यदत्र कण्ठवर्तिन्यपि सुवर्णाभरणे निखिलगुणशृङ्गाटके
रतिमन्मथनाम्नि नाटकेऽन्यतो गवेष्यते ॥

सू ॥ (सपरितोषम्) । आर्ये दीयतामवधानम् ।

अन्येन्द्रं जगदस्थितेन्द्रमपि वा कर्यां जगल्भेऽन्वये
सम्भूतो ननु बालकृष्णसचिवोत्तंसस्य रूपान्तरम् ।
लक्ष्म्यम्बाहृदयाब्धिशीतकिरणो लोकेऽभिगम्यः सता-
मस्तिन्यस्तपदो गुणैरिह जगन्नथाभिधानः कविः ॥

* * *

सूत्र ॥ * अहमेव सह मारिषेण सनर्मसचिवस्य मन्मथस्य
समाददे नैपथ्यम् । आर्यापि रत्याः ॥

॥ प्रस्तावना ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

मोदन्तां हतशात्रवाः चिरतरं धात्रीश्वरा धार्मिकाः
स्वैरोन्मीलितसस्यजातसुभगं वर्षन्तु धाराधराः ।
वीरोदारसुधीगृहेषु विहृतिं बध्नातु पद्मालया
चातुर्वर्ण्यमपि स्वधर्मनिलयं नित्योत्सवैरेधताम् ॥

॥ इति निष्क्रान्ताः सर्वे ॥

॥ श्रीदेव्यर्पणमस्तु ॥

Colophon:

इति जगन्नाथपण्डितकृतौ रतिमन्मथे नाटके पञ्चमोऽङ्कः ॥

सम्पूर्णमिदं नाटकम् ॥

श्रीरामचन्द्राय नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीवेदव्यासाय नमः ॥

युवाभिधाने शरदि शरत्कार्तिकशुक्लके ।

तृतीयायां भृगोर्वारे लिखितं पुस्तकं त्विदम् ॥

बादरायणगोत्रोत्पन्नस्य जीवाजीपन्तस्येदम् ॥

श्रीकृष्णार्पणमस्तु ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

तैलाद्रक्ष जलाद्रक्ष रक्ष मां परहस्ततः ।

मूर्खहस्ते न दातव्यमेवं वदति पुस्तकम् ॥

Subject: Ratimanmathanāṭaka 1-5 acts.

Remarks:—The Ms. is in good condition.

Jagannātha, the author of this drama, Ratimanmatha, was a native of Tanjore and different form his namesake, the author of the Rasagaṅgādhara and other works. He is probably identical with the author of the Śarabharājavilāsakāvya, described under No. 4241.

The drama deals with the union between Rati and Manmatha. The drama is unpublished.

॥ रतिमन्मथनाटकम् ॥

4489. RATIMANMATHANĀṬAKAM.

J. L. Collection No 647. Substance—Paper. Size—12½ × 6¾

438

inches. Sheets—9. Lines—13 to a Page. Script—Devanāgarī. No. of Granthas—225. Author—Jagannātha. Incomplete.

Beginning—Same as No. 4488.

End:

शारिका ॥ (सशिरःकम्पम्) । सहि उववण्णं खु एदं । तासइ अयविलंबिदं अप्पणो समीहिदं । अहं विजइणिओअं अणुट्ठइमम् ।

(इति निष्क्रान्ताः सर्वे)

॥ प्रवेशकः ॥

Colophon: (Sheet No. 8)

इति प्रथमोऽङ्कः ॥

Subject: Ratimanmathanāṭaka 1-2 acts.

Remarks:—The Ms. is in good condition. This Ms. abruptly ends with the beginning of the second act.

॥ रत्नकेतूदयम् ॥

4490. RATNAKETŪDAYAM.

Burnell's Catalogue No. 10697. Page 172. Right column. Substance--Palm leaf. Size—15×1 inches. Leaves—41. Lines—6 to a Page. Script—Grantha. No. of Granthas—900. Author—Bālakavi. Incomplete.

Beginning:

...जयाय निर्गतो नाद्यापि प्रतिनिवृत्तो रत्नकेतुस्तदिदानीमसुकरः परिषदादेशः * *

अस्ति खल्वस्मदृश रत्नकेतूदयं नामापूर्वं नाटकम् *

* अस्ति तुण्डीरमण्डलमण्डनायमानमूलाण्डं नाम महानग्रहारः ।

तत्र पित्रतिथिदेवतार्चकाः
श्रोत्रियाः सुमतयो बहुश्रुताः ।
कर्णलेह्यकवितासुधोर्मिका
भासुरा............भूसुराः ॥

तेषु च त्रिकरणविशुद्धस्य सामशाखाध्यायिनो भरद्वाजकुलपरिष्कारस्य यौवनसरस्वतीतनूज....मनोजवसस्य ....मनीषिणः पुत्रो विचित्रवाग्विस्तरस्य कालहस्तिकुबेरात्मसम्भवः कमलसंभवकुटुम्बिनीपरिचरणशीलो बालकविः कस्य...सीमानमवतीर्णः ।

*　　　*　　　*

सौन्दर्यद्रविणार्णवकोशवसते सौजन्यरत्नाम्बुधे
धीराग्रेसर रामवर्मनृपते जीयाः सहस्रं समाः ॥

इति । अनन्तरं तेन सरसकवितागोष्ठीकृतकालक्षेपेण महाराजेन रत्नकेतूदयं नाम नाटकं भवता नवं निर्मीयतामिति मुदा नियुक्तः.... ।

End :

विदूषकः ॥ कहिं गदो दासी एपुत्तओ सोणहअरो ॥
(सर्वाः सकौतुकं विदूषकं पश्यन्ति)
सख्यौ ॥...... ....

Colophon: Nil.

Subject: Ratnaketūdaya 1-3 acts.

Remarks:—The Ms. is in a very much decaying condition. There is a loose leaf containing the following.

भजे वेतण्डवदनं चण्डभानुनिभद्युतिम् ।
विघ्नदण्डप्रचण्डं तु शैलेश................ ॥

....सन्ततं वदने मम ।
वक्त्रं वारिजतुल्यवक्त्रसदृशं कोपात्किमत्रेति मे ।
कालक्षेपणमिन्दुमोचनविधौ त्वांक्षन् शिवः पातु वः ॥

Bālakavi, native of Mullaṇḍram in the North Arcot district, is the author of this drama. He was a contemporary of the famous Uddaṇḍakavi, the author of the Mallikāmāruta. Perhaps he is identical with the Bālakavi mentioned by Śrī Nīlakaṇṭha Dīkṣita in the Prastāvanā to his Nalacaritanāṭaka.

The work is available in print having been published by the Śrīvidyā Press, Kumbhakonam.

॥ राघवानन्दम् ॥

4491. RĀGHAVĀNANDAM.

Burnell's Catalogue No. 10632. Page 172. Left column. Substance—Palm leaf. Size—16 × 1¼ inches. Leaves—94. Lines—6 or 7 to a Page. Script—Grantha. No. of Granthas—2000. Author—Veṅkaṭeśvara. Complete.

Beginning:

श्रेयांसि प्रतनोतु ते कुवलयश्रीबन्धुकान्त्युद्गमो
गोविन्दोऽवतरन्प्रसाधनकृते सन्मार्गमासेदुषाम् ।

मध्ये वारिधि दैत्यपुङ्गवहृतामानीय भूयस्त्रयीं
लोकानामभिवृद्धये समुचितो येनात्मभूः स्थापितः ॥

(नान्द्यन्ते)

सूत्रधारः ॥ (कतिचित्पदानि गत्वा)। (पुरोऽवलोक्य)।
भगवता रङ्गनायिकासनाथेन रङ्गनाथेन परिष्कृताया-
मस्यां सभायामलमङ्गकलापाचरणविलम्बेन ॥

* * *

(नेपथ्याभिमुखमवलोक्य)

मारिष, सर्वतन्त्रस्वतन्त्रस्य षड्दर्शनी सागरनिशाकरस्य
षड्भाषासार्वभौमस्य प्रतिदिनप्रबन्धनिर्माणपरमेश्वरस्य
निध्रुवकाश्यपान्वयपारावारकौस्तुभस्य धर्मराजमनी-
षिणो भागधेयपरिणामेन वेङ्कटेश्वरकविना गृहीतवस्तु
राघवानन्दं नाम नाटकमभिनेतव्यमिति ।

End:

तथापि यदि प्रसन्नो भगवान् इदमस्तु भरतवाक्यम्

वाग्देव्या सममिन्दिरा विहरतां वर्षन्तु वा वासवो
लोकस्यास्तु सुखाय नीतिनिरता रक्षन्तु पृथ्वीं नृपाः ।
सत्यज्ञानसुखस्वरूपमनघैरुत्तंसितं वाङ्मयै-
रात्मज्योतिरुदेतु चेतसि सतां यस्मिन्जगत्कल्प्यते ॥

वसिष्ठः ॥ एवं भवतु ।

रामः ॥ (प्रविशामो गृहाभ्यन्तरं मातृजनमानन्दयितुम्)
(परिक्रम्य) ॥ निष्क्रान्ताः सर्वे ॥

Colophon:

सप्तमोऽङ्कः ॥

समाप्तमिदं राघवानन्दं नाम नाटकम् ॥

सीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्रार्पणमस्तु ॥ हरिः ॐ

श्रीविद्यारामाय नमः ॥ श्रीदेव्यै नमः ॥ हरिः ॐम् ॥

Subject: Rāghavānanda 1-7 acts.

Remarks :—The Ms is in a fairly good condition.

The author of this drama, Venkaṭeśvara Kavi is the son of Dharmarāja Dīkṣita of Naidhruvakāśyapagotra, author of Sabhāpativilāsa Nāṭaka, which is described under No. 4529. He was a contemporary of Śāhaji and Serfoji I (1684-1730 A. D.)

The work deals with the story of the Rāmāyaṇa. It has not been published so far.

॥ राघवाभ्युदयम् ॥

4492. RĀGHAVĀBHYUDAYAM.

Burnell's Catalogue No. 5257. Page 172. Left column. Substance—Paper. Size—$8\frac{1}{4}\times 6$ inches. Sheets—57. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—1300. Author—Bhagavanta Rāya. Complete.

Beginning:

विद्युद्वेल्लितवारिवाहपटलीराजज्जटाकुन्तलं
कालिन्दीमिलदभ्रसिन्धुविलसत्कालाहिमुक्तास्रजम् ।
ध्वान्तीन्मिश्रितकौमुदीलसदिभत्वङ्नद्धकौशेयकं
सम्पृक्तं भवभूधरेन्द्रसुतयो भूयाद्वपुर्भूतये ॥ १ ॥

(नान्द्यन्ते ।)

सूत्रधारः ॥ अलमतिविस्तरेण । (पुष्पाञ्जलिं विकीर्य) (परितोऽवलोक्य) अहो समुज्जृम्भितः खलु अयं ऋतूनामग्रणीर्वसन्तः । तथा हि ॥

शिशिरः क्लिष्टां भ्रमरीं विरुतैः परिसान्त्वयन्भ्रमरः ।
क्रीडति तथा निकामं सुखितः सहकारतरुशिखरे । २ ।

(नेपथ्याभिमुखमवलोक्य)

मारिष ॥ इतस्तावत् ॥

(प्रविश्य)

पारिपार्श्वकः ॥ भाव एषोऽस्मि ॥

सूत्रधारः ॥ अद्य खलु भारद्वाजकुलजलधिकौस्तुभेन त्र्यम्बकरायमखिना समारब्धस्य क्रतोर्दिदृक्षया आगतेन नानादिगन्तवासिना विद्वज्जनसमाजेन सबहुमानमाहूय समादिष्टोऽस्मि ।।

परि ॥ वैदेशिकोऽस्मीति पृच्छामि
'कः पुनरयं त्र्यम्बकरायमखी नाम' ॥

सूत्रधारः ॥ किं न जानासि ॥ निजगुणगणकुसुमसुरभीकृतदिगन्तमेतमपि ॥

* * *

पारिपार्श्वकः ॥ (सप्रत्यभिज्ञम् ॥)

एकदक्ष्माधिपतेरिदंविधगुणः साचिव्यधुर्यः श्रुतः
प्राज्ञः कश्चिदजातशत्रुसदृशो गङ्गाधरार्याभिधः ।

तैस्तैर्येन निजैरनन्यसुलभैरावर्ज्यमानो गुणै-
राचार्यप्रतिपत्तिमेव कलयन्नासीदमुष्मिन्नृपः ॥ ६ ॥

सू ॥ दिष्ट्या जानामि तं महाभागम् ॥ तर्हि तस्यात्मसम्भवं नृसिंहरायमखीन्ति सुगृहीतनामधेयं महानुभावमपि भवाञ्जानीयात् ॥

पारि ॥ बाढं जाने ॥

सूत्र ॥ तस्यैवायमनुजन्मा ॥

पारि ॥ ननु तदनुजत्वमेव पर्याप्तं प्रख्यात्यै ।

सूत्र ॥ सत्यमुक्तं भवता ॥

पारि ॥ सम्प्रति यज्ञवाटं प्रविष्टोऽहं शालान्तरप्रविष्टमनतीतकौमारमन्यं कमपि यजमानमद्राक्षम् ॥ तं पुनर्जानासि ॥

सू ॥ कथं न जानामि ॥

साचिव्यधुर्यो विहितः पितृव्ये-
णादृत्य शाहक्षितिपालमौलेः ।
आनन्दनामा विमलप्रसूतिः
पुत्रो नृसिंहाध्वरिणः स एषः ॥ ८ ॥

पारि ॥ भाव कीदृशः परिषदादेशः ॥

सू ॥ तस्यैव त्र्यम्बकरायमखिनः समनन्तरानुजेन भगवन्तरायनामधेयेन सत्कविसार्वभौमेन सम्प्रति प्रणीतं राघवाभ्युदयं नाम नाटकमभिनेतव्यमिति ॥

पारि ॥ विद्यमानेषु प्राचामपि रूपकेषु कथं नूतनप्रणीते तस्मिन्नेवं परिषदो बहुमानः ।

सूत्र ॥ तदेतत्प्रत्यग्रघटिताञ्जलिना द्वितीयप्राचेतसेन कुण्डिनकुलमण्डनेन रामभद्राध्वरीन्द्रेण विमृश्य सशिरःश्लाघमनुमोदितमिति ।

* * *

पारि ॥ (सहर्षम्) ॥ तदादिश्यन्तां वर्णिकापरिग्रहाय सर्वे कुशीलवाः ॥

सूत्र ॥ किंन पश्यसि ममायमग्रजन्मा दशरथभूमिकामादाय गृहीतरामलक्ष्मणभूमिकाभ्यां निजकुमाराभ्यामित एवाभिवर्तते । तदावामप्यनन्तरकरणीयाय सज्जीभवावः ॥ (इति निष्क्रान्तौ)

॥ प्रस्तावना ॥

End

रामः ॥

दुर्धर्षं तदनुग्रहेण भवता भग्नं धनुः शाम्भवं
दारा रूपजुषः समुन्नतकुलोत्पन्नाः समासादिताः ।
दुर्दान्तः स हतो निशाचरपतिर्लब्धं यशो निस्तुलं
लोका वीतभयाः कृताश्च किमितोऽप्यन्यत्प्रियं मेऽधुना ॥२४॥

तथापीदमस्तु भरतवाक्यम् ।

अवतु विधिवधीश्वरो धरित्री-
मनुसरतु प्रकृतिव्रजः स्वधर्मम् ।

भवतु कृतिरियं भुवि प्रसिद्धा
भजतु मुदं भगवानपि प्रकामम् ॥
इति निष्क्रान्ताः सर्वे ॥

Colophon:

श्रीमति राघवाभ्युदये रामोद्वाहाभिषेको नाम सप्तमोऽङ्कः ॥
रचितं भगवन्नाम्ना श्रीगङ्गाधरसूनुना ।
राघवाभ्युदयं नाम नाटकं जयति क्षितौ ॥
लेखकपाठकयोः शुभं भूयात् ॥

सीतारायै नमः ॥ श्रीरामाय नमः ॥ श्रीरस्तु ॥ हेरम्बाय नमः ॥

Subject: Rāghavābhyudaya 1-7 acts.

Remarks:—The Ms. is in good condition.

A paper transcript of this Ms. is found in this Library. See T. V. No. 475.

Bhagavantarāya, the author of this drama is already familiar to us as the author of the Mukundavilāsakāvya, described under No. 3719. Students of the Maratha History of Tanjore are aware of Bhagavanta and his works.

The present drama, which is yet unpublished, deals with the story of the Rāmāyaṇa.

॥ रुक्मिणीपरिणयम् ॥

4493. RUKMIṆĪPARIṆAYAM.

Burnell's Catalogue No. 10687. Page 172. Right column.

Substance—Palm leaf. Size—15⅞ × 1½ inches. Leaves—55. Lines—7 to a Page. Script—Grantha. No. of Granthas—1500. Author—Varada. Complete.

Beginning :

वक्षःसीमनि वामतश्च नयने स्थालौ सदा बिभ्रतः
प्रायेण श्वशुरन्तिके तनयतः श्वश्रूं पदे कुर्वतः ।
यस्यान्तःपुरभूर्भुजान्तरमभूदित्यत्र को वि(स्मयः)
तन्मे पुष्यतु मङ्गलानि त्रिकसत्तापिञ्छमित्रं महः ।

* * *

(नान्द्यन्ते)

सूत्रधारः ॥ (सप्रश्रयम् ॥)

शिरसा धारित एष मया वेलिगोटिकुलतिलकवीरशि-
ङ्गभूपालदेवादेशः । यथा—अस्मत्कुलदैवतस्य भ-
गवतः कोदण्डपाणेर्महोत्सवयात्रायामस्यामस्मत्सौहृ-
दश्चैवधेरात्रेयचूडामणेरखिलकलानटनविलासरङ्गस्य ता-
तगुरुभागिनेयाप्पयार्यभागधेयस्य तरुणाग्निहोत्रिणो
वरदकवेः कृतिं रुक्मिणीपरिणयाभिधानं नाटकं
प्रयुज्यमानं द्रष्टुमिच्छामि । तत्त्वयाभिनेतव्यमिति ॥

* * *

वसन्तवर्णनं प्रस्तौमि ॥

माधवमुपवनसीमनि लक्ष्म्या योजयितुमिह कृताभ्युदयम् ।
उदिता सुमनो विततिः सैषा सर्वेशयोगमायेव ॥

॥ इति निष्क्रान्ताः ॥

॥ प्रस्तावना ॥

End :

च ॥ किन्ते भूयः प्रियमुपहरामि ।

॥ कृ ॥ तात ॥

निष्कण्टकं कल्पितमिन्द्रराज्यं
विश्वम्भरा वीतभरा बभूव ।
लब्धा च लक्ष्मीरिव रुक्मिणीयं
किमर्थनीयं कृतकर्मणां नः ॥

तथापीदमस्तु भरतवाक्यम् ॥

भावानत्र हरेः प्रकल्प्य ललितान् भक्त्या तदेकान्तया
शृङ्गारप्रणयी कविर्भगवतः श्रीमत्कथापन्नभूत् ।
स श्रेयांसि समेतु कृष्णकृपया सर्वैः सुहृद्भिः समं
जीयात्काव्यमिदं चिराय सुखिनः सर्वेऽपि सन्तु द्विजाः ॥

॥ इति निष्क्रान्ताः सर्वे ॥

Colophon:

सप्तमोऽङ्कः ॥

करकृतमपराधं क्षन्तुमर्हन्ति सन्तः ॥

Subject: Rukmiṇīpariṇayanāṭaka. 1-7 acts.

Remarks:—The Ms. in a fairly good condition. This drama of Varadakavi, dealing with the marriage of Rukmiṇi with Śrī Kṛṣṇa has been published by the Nirṇayasāgara Press, Bombay.

॥ रेवतीहलाङ्कम् ॥

4494. REVATĪHALĀṄKAM.

Burnell's Catalogue No. 10693. Page 173. Left column. Substance—Palm leaf. Size—$14\frac{1}{8}\times1\frac{1}{2}$ inches. Leaves—56. Lines—5 to a Page. Script—Grantha. No. of Granthas—900. Author—Puruṣottamadīkṣita. Complete.

Beginning:

यन्नृत्यरङ्गे दैत्यारिधातारौ तालधारिणौ ।
..................श्चं सदेवश्रेयवि...... ।

॥ किञ्च ॥

ज्योतिस्तत्वमिदं विभज्य बहुधा नेत्रत्रयीं तन्वतो
जामातुर्हिमवत्प्रसिद्धिरपि मे तातस्य सा यास्यति ।
इत्यात्मेशविलोचने करयुगेनाच्छाद्य तिग्मार्चिषी
नेत्रेणेन्दुमयेन तं व्यतनुते सा स्यान्मृडानी मुदे ॥

(नान्द्यन्ते)

सूत्रधारः ॥ (सहर्षम् ॥)
आकर्णनालोकनयोर्यदस्ति करणद्वयम् ।
तदन्यत्र निराकाङ्क्षं यतस्तदभिनीयताम् ॥

इति किल सकलदिविषदाराधितचरणारविन्दस्य भगव-तस्त्यागराजस्य यात्राप्रसङ्गेन समग्राशाः परिषदोऽयमादेशः ॥

* * *

सूत्रधारः ॥ अयि लास्यलते किमनधीतरेबतीहल्ला
ङ्कनाटकेव पुनर्व्याहरसि ॥

* * *

अयि किं ना जानासि ॥ सकलभूपालमकुटोपलालितवाग्विलासः सर्वभाषासार्वभौमः सुङ्केसलग्रामवास्तव्यो भारद्वाजगोविन्दसुधीनन्दनः श्रीपुरुषोत्तमदीक्षितनामा कविः ॥ उक्तश्चैवमभियुक्तैः ॥

प्रतिभटविद्वत्काविघटमुसलात्पुरुषोत्तमाध्वरिकवीन्द्रात् ।
अन्यं न मन्यते नः परिषदि विदुषां विभूषणं हृदयम् ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

त्रिभुवनगुरोर्धातुर्दैवाज्जगज्जयतु श्रिया
खलजनसमारम्भो दूरे बलेन निवर्त्यताम् ।
यदभिलषितं भूयः पुम्सां भवेत्तदयत्नतो
मधुरवचसां वाग्व्यापारश्चिराय समेधताम् ॥

ततः समीहितार्थसंविधानकृते निजनगरानुसरणाभि-
लाषिणो मणिकट्टकतटावरोहणं नाट्यन्ते ।

निष्क्रान्ताः सर्वे ॥

Colophon:

पञ्चमोऽङ्कः ॥

Subject: Revatīhalānka. 1-5 acts.

Remarks:—The Ms. is in a fairly good condition.

A paper transcript of this Ms. is available in this Library. See T. V. No. 65.

The author of this drama is one Puruṣottama, son of Govinda and he belonged to the Bhāradvājagotra. He seems to have been the native of a village called Suṅkesalagrāma.

The work deals with the purāṇic story of the marriage of Revatī with Halāṅka or Balarāma. The work has not been printed so far.

॥ विक्रमोर्वशीयम् ॥

4495. VIKRAMORVASĪYAM.

Burnell's Catalogue No. 5228. Page 172. Left column. Substance—Paper. Size—10¾ × 4 inches. Sheets—57. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Kālidāsa. Complete.

Beginning:

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी
यस्मिन्नीश्वर इत्यनन्यविषयः शब्दो यथार्थाक्षरः ।
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥
परस्परविरोधिन्योरेकसंश्रयदुर्लभम् ।
सङ्गतं श्रीसरस्वत्योर्भूतयेऽस्तु सदा सताम् ॥ २४ ॥
इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति श्रीमत्कालिदासकृतौ विक्रमोर्वशियनाटके पञ्चमोऽङ्कः ॥
समाप्तमिदं विक्रमोर्वशीयं नाटकम् ॥

Subject: Vikramorvaśīyam 1–5 acts.

Remarks:—The Ms. is in good condition. On the title page is given तुलजारामस्येदं पुस्तकम्

This drama of Kālidāsa has been printed several times over. The revised edition of the work with Introduction and Notes by M. R. Kale, Bombay is important.

The work deals with the union of Purūravas and Urvaśi, one of the celestial nymphs.

Descriptive No.	Collection No.	Substance	Size inches	No. of Sheets or leaves
4496	B. L. 5229	Paper.	$9\frac{1}{2} \times 4\frac{1}{4}$	37
4497	„ 5230	do.	$9\frac{1}{2} \times 4$	38
4498	„ 5231	do.	$10\frac{3}{4} \times 4\frac{1}{2}$	28
4499	„ 5314	do.	$13\frac{3}{4} \times 6$	30
4500	„ 10621	Palm leaf.	$17\frac{1}{2} \times 1\frac{3}{8}$	33
4501	„ 10622	do.	$14\frac{1}{2} \times 1\frac{1}{4}$	29
4502	„ 10623	do.	$19\frac{1}{2} \times 1\frac{1}{4}$	36
4503	T. S. 721	Paper.	$9\frac{3}{4} \times 4\frac{3}{4}$	26
4504	„ 722	do.	$9\frac{3}{4} \times 4\frac{1}{2}$	56
4505	B. L. 5233	do.	$9\frac{3}{4} \times 4\frac{1}{2}$	32
4506	„ 5232	do.	$9\frac{1}{2} \times 4\frac{1}{4}$	16

There are several copies of the Vikramorvaśīya in this library and they are tabulated hereunder.

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
10-12	Devanāgarī.	Complete.
8	do.	,,
10	do.	,,
10	do.	,,
6 or 7	Grantha.	,,
7 or 8	do.	,,
7	do.	,,
15 or 16	Devanāgarī.	,,
8	do.	,,
10	do.	Incomplete (1-5 Acts, wants end).
9-11	do.	,, (1-2 Acts).

॥ विक्रमोर्वशीयव्याख्या ॥

4507. VIKRAMORVAŚĪYAVYĀKHYĀ.

Burnell's Catalogue No. 10624, Page 172, Left column. Substance—Palm leaf. Size—16¾ × 1½ inches. Leaves—34 (69-102). Lines—7 to a Page. Script—Grantha. No. of Granthas—1000. Author—Kāṭayavema. Complete.

Beginning:

वेदान्तेष्वित्यादि ॥ स स्थाणुर्वः निःश्रेयसाय नित्यानन्दायास्त्विति सम्बन्धः । सदातिष्ठतीति स्थाणुः । स्थाणुरित्यौणादिको णुप्रत्ययः ॥ निःश्रेयसमिति "अचतुरविचतुर" इत्यादिनाचूप्रत्ययान्तं निपातितम् । कीदृशः । स्थिरभक्तियोगसुलभः स्थिरो भक्तियोगो येषान्ते तथोक्ताः । तैः सुलभः सुखेन प्राप्यः ॥

End:

॥ परस्परेत्यादि ॥ परस्परविरोधिन्योरन्योन्यद्वेषिण्योः श्रीसरस्वत्योर्लक्ष्मीभारत्योरेकसंश्रयदुर्लभमेकस्मिन् संश्रये आश्रये दुर्लभमलभ्यं सङ्गतं सङ्गमः सतां सज्जनानां भूतये ऐश्वर्याय सदा सर्वदा अस्तु विधताम् । अत्र शुभशंसनात्प्रशस्तिर्नाम सन्ध्यङ्गमुक्तं भवति ।

इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति श्रीकाटयवेमभूपविरचिते कुमारगिरिराजीये विक्रमोर्वशीयव्याख्याने पञ्चमोऽङ्कः ।

ग्रन्थश्च परिसमाप्तः ॥

अविरल + सन्तः ॥

श्रीगुरुभ्यो नमः ॥ श्रीमहागणपतये नमः ॥

विक्रमोर्वशीयनाटकव्याख्यानं समाप्तम् ॥

Subject: Vikramorvaśīyavyākhyā. 1-5 acts.

Remarks: —The Ms. is in a fairly good condition.

Kāṭayavema's commentary on the Vikramorvaśīya has not been printed so far.

॥ विक्रमोर्वशीयव्याख्यानम् ॥

4508. VIKRAMORVAŚĪYAVYĀKHYĀNAM.

Burnell's Catalogue No. 10625 Page 172, Left column. Substance—Palm leaf. Size—$17\frac{1}{4} \times 1\frac{3}{4}$ inches. Leaves—81. Lines—5-7 to a Page. Script—Telugu. No. of Granthas—1000. Author—Kāṭayavema. Complete.

Beginning:

श्रीमत्काटयवेमस्य कृतिर्विज्ञानशालिनः ।
कुमारगिरिराजीयं जीयादाचन्द्रतारकम् ॥ १ ॥

वेदादीनां विशुद्धानां विद्यानां जन्महेतवे ।
पार्वतीपरतन्त्राय परस्मै वस्तुने नमः ॥ २ ॥

जयति विजगलक्ष्मीवल्लभोऽनन्तकीर्तिः
कुमरगिरिनृपालो राजवेश्याभुजङ्गः ।
बिरुदमसहमानो (काटभूपो) यदीयं
भवति विमतवर्णो देववेश्याभुजङ्गः ॥

अविघ्नमस्तु ॥

अत्र कविः कालिदासः प्रारीप्सितस्य ग्रन्थस्याविघ्न-परिसमाप्त्यर्थमिष्टदेवतास्मरणपूर्वकमाशिषं प्रयुङ्क्ते ॥ वेदान्तेष्वित्यादि ॥ स्थाणुः शिवः वः युष्माकं०

Same as No. 4507.

End and colophon—Same as No. 4507.

Remarks:—The Ms. is in a most decaying condition.

॥ विक्रमोर्वशीयव्याख्या ॥

4509. VIKRAMORVAŚĪYAVYĀKHYĀ.

J. L. Collection No. 648. Substance—Paper Size—8×4¼ inches. Sheets—43. Lines—15 to a Page. Script—Devanāgarī. No. of Granthas—1290. Author—Kāṭayavema. Complete.

Beginning, end, colophon and subject—Same as No. 4507.

Remarks:—The Ms. is in a decaying condition.

॥ विक्रमोर्वशीयव्याख्या ॥

4510. VIKRAMORVAŚĪYAVYĀKHYĀ.

Not noticed by Burnell. Ms. No. 15540.

Substance—Palm leaf. Size—17¼×1½ inches. Sheets—27(67-93). Lines—9 to a Page. Script—Grantha. No. of Granthas—1000. Author—Kāṭayavemabhūpāla. Complete.

Beginning, end, colophon and subject—Same as No. 4507.

Remarks:—The Ms. is in a fairly good condition.

॥ विद्यापरिणयम् ॥

4511. VIDYĀPARIṆAYAM.

Burnell's Catalogue No. 5224. Page 172. Right column. Substance—Paper. Size—10 × 5⅜ inches. Sheets—79. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1810. Author—Ānandarāyamakhin. Complete.

Beginning:

सत्यज्ञानसुखाद्वयेऽपि बहुधा रूपाणि बिभ्रच्चिरा-
दप्रज्ञेयविलासवैभवनिजाविद्याविधेयीकृतः ।
आनन्दान्विषयोदिताननुभवन्भूयः स्वया विद्यया
प्रश्लिष्टः परमार्थभोगमुदितः पायादुमायाः पतिः ॥

End:

अस्तु स्वस्ति जगत्त्रयाय जगतीं रक्षन्तु भूमीभुजो
धर्मेणैव पथा भवन्तु सुखिनः सर्वेऽपि गोब्राह्मणाः ।
पर्जन्यागमसक्रमेण जगतश्चक्रं तदा वर्तता
विद्वांसो विजयीभवन्तु भगवद्भक्त्या त्रयी वर्धताम् ॥
इति निष्क्रान्ताः सर्वे ॥

Colophon:

सप्तमोऽङ्कः ॥

Subject: Vidyāpariṇaya 1-7 acts.

Remarks:—The Ms. is in a fairly good condition.

Ānandarāyamakhin was one of the ministers of the Maharatha kings of Tanjore. For detailed remarks on Ānanda-

rāya, please refer to the article " Ānandārya Makhin *versus* Appādhvarin " in the Journal of Oriental Research Vol. III.

The present drama is an allegorical one written from the point of view of Advaita Vedānta. The Nirṇayasāgara Press has published the work.

॥ वेणीसंहारम् ॥

4512. VEṆĪSAMHĀRAM.

Burnell's Catalogue No. 5209. Page 1/2. Right column.

Substance—Paper. Size—10½ × 4 inches. Sheets —90. Lines — 7 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Bhaṭṭanārāyaṇa. Complete.

Beginning:

जयति सनाभिर्जगतां स्वनाभिरन्ध्रोद्भवजगद्बीजः ।
दामोदरो निजोदरगह्वरनिक्षिप्तनिखिलजगदण्डः ॥

End:

तदिदमस्तु भरतवाक्यम् ॥

अकृपणमतिः कामं जीव्याज्जनः पुरुषायुषं
भवतु भगवान् भक्तिद्वैधं विना पुरुषोत्तमे ।
दयितभुवनो विद्वद्बन्धुर्गुणेषु विशेषवि-
त्सततसुकृती भूयाद्भूयः प्रसाधितमण्डलः ॥

कृष्णः ॥ एवमस्तु ।

इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति षष्ठोऽङ्कः ॥

समाप्तमिदं वेणीसंहरणं नाटकम् ॥

॥ श्रीरामचन्द्रार्पणमस्तु ॥

प्लवनाम संवत्सर आषाढशुद्धपञ्चमी भानुवासर

Subject: Veṇīsamhāranāṭakam 1-6 acts.

Remarks:—The Ms. is in good condition. On the title page is given ' तुळजाराजस्येदं पुस्तकम् '

The Veṇīsamhāra has as its theme the famous incident of the Mahābhārata where Draupadī vows that she will not tie up her hair which was dishevelled by Duśśāsana unless he were killed and his blood besmeared on her hair.

The work has been printed by the Nirnayasāgar Press, Bombay.

There are several copies of the Veṇīsamhāra in this library and they have been tabulated hereunder.

Descriptive No.	Collection No.	Substance	Size inches	No. of Sheets or leaves.
4513	B. L. 5210	Paper.	$10 \times 4\frac{1}{4}$	69
4514	„ 5211	do.	$9\frac{1}{2} \times 4\frac{1}{8}$	65
4515	„ 5212	do.	$9\frac{1}{2} \times 4\frac{1}{4}$	56
4516	„ 5315	do.	14×6	55
4517	„ 10607	Palm leaf.	$18\frac{3}{4} \times 1\frac{1}{2}$	34
4518	„ 10608	do.	$18\frac{1}{4} \times 1\frac{1}{4}$	80
4519	P. A. 357	Paper.	9×4	68
4520	„ 358	do.	$9\frac{3}{4} \times 4\frac{1}{4}$	8
4521	B. L. 5213	do.	$9\frac{1}{2} \times 4\frac{1}{4}$	26
4522	„ 5214	do.	$10\frac{3}{8} \times 5\frac{1}{4}$	12
4523	J. L. 649	do.	$10\frac{1}{4} \times 4$	49
4524	„ 650	do.	$9\frac{1}{2} \times 4\frac{1}{2}$	26
4525	„ 651	do.	$10\frac{1}{2} \times 5\frac{1}{4}$	4
4526	„ 652	do.	9×6	16
4527	„ 653	do.	8×5	29
4528	„ 654	do.	$9\frac{1}{2} \times 4\frac{3}{4}$	20

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
8-10	Devanāgarī.	Complete.
8 or 9	do.	,,
10	do.	,,
10	do.	,,
8	Grantha.	,,
5-8	do.	,,
8	Devanāgarī.	Incomplete. (1-5 Acts, wants beginning and end)
9-11	do.	,, (1st Act only.)
11-13	do.	,, (1-3 Acts, wants beginning and end)
16	do.	,, (1-3 Acts, wants end)
6	do.	,, (3-4 ,,)
8	do.	,, (2-4 ,,)
16	do.	,, (3-4 Acts, wants beginning)
10	do.	,, (3rd ,,)
18	do.	,, (3-6 ,,)
14	do.	,, (2-6 ,,)

॥ सभापतिविलासम् ॥

4529. SABHĀPATIVILĀSAM.

Burnell's Catalogue No. 10682. Page 174. Left column.

Substance—Palm leaf. Size—15⅜ × 1¼ inches. Leaves—155. Lines—4 to a Page. Script—Grantha. No. of Granthas—1500. Author—Veṅkaṭeśvara. Complete.

Beginning:

वामाङ्कस्तनकुम्भपत्रमकरीविन्यासशिल्पक्रम-
स्विद्यद्दक्षिणपाणि रौद्रकरुणासंवादसीमालिकम् ।
अस्त्रीपुंसनपुंसकाकृति किमप्यानन्दगन्धोर्मिल-
द्दिव्यं तन्मिथुनं तनोतु भवतामानन्दमव्याहतम् ॥

* *

सूत्रधारः ॥ (पुरोऽवलोक्य सानन्दम्) अमी खलु * करुणावलोकनपरिपालितशरणागतजनततेः कनकसभापतेः यात्राप्रसङ्गेन सन्निहिताः सकलकलाकलासुधाम्बुधि कृतमज्जनाः सज्जनाः । अहो परमानन्दनिदानममीषां दर्शनम् ॥

* * *

सूत्रधारः ॥ (विचिन्त्य) । कण्ठगतमेव मृग्यते चामीकरम् । ननु निर्दिष्टगुणोत्तरं सभापतिविलासं...
मस्मद्गृह एव सकलरसमणिगणहाटकपेटकं नाटकम् ॥
तदेतत्प्रयुञ्जानैरस्माभिरा ... रवश्यमवश्यनेतव्यानि सामाजिकमनांसि ।

नटी ॥ (सकौतुकम्) को णाम कइंदो तारिसस्स पबंधस्स ॥

(को नाम कवीन्द्रस्तादृशस्य प्रबन्धस्य ॥)

सू ॥ आर्ये जानासि सकलकलाकलापपारदृश्वा मणल्लूर-
ग्रहारवासि....धर्मराजाभिधानो मनीषी ।

नटी ॥ केणमुणीअदि पडिदिणं पबंधनिम्माणजंमणजस(?)
....ररिञ्छोलिआ सुरहिअदसदिसामुहो सअलभूमंडल-
पंडिअमंडिअणिच्चहिज्जविज्जाणडीरंगथलाअंतणाणेंद-
मुणिंदसहासंपत्तप्पभासासव्वहोमावरणामहेओ सो वि-
बुहेंदो, जस्स दव्वीअरसिहामणिभासं जिहंगअसैणि-
हाणं कंपि अंकरिस्स भसइ । अप्पआसविअंभमाणासु-
महुरचित्तवित्थअचौविहकइआसंदंसिदचमकारस्स णा-
डअप्पमुहरूपअचित्तेइवुत्त पज्जापहिअमणीसाविसेस-
स्स तस्स को णाम ण सिलाहेइ ॥

(छाया ॥ केन न ज्ञायते प्रतिदिनप्रबन्धनिर्माणजन्मय-
शोघनसाररिंछोलिकासुरभितदशदिशामुखः सकलभूमण्ड-
लपण्डितमण्डितमनित्यहृद्यविद्यानटनरङ्गस्थलायमानज्ञाने-
न्द्रमुनीन्द्रसभासम्प्राप्तप्रभावासार्वभौमापरनामधेयः
स विबुधेन्द्रः, यस्य दर्वीकरशिखामणिभाष्यं जिह्वा-
ग्रकृतसंनिधानं कमप्युत्कर्षं पुष्यति । अप्रयासविजृम्भ-
माणाशुमधुरचित्रविस्तरचतुर्विधकवितासन्दर्शितचमत्का -
राय नाटकप्रमुखरूपकचित्रेतिवृत्तपद्यापथिकमनीषाविशे-
षाय तस्मै को नाम न श्लाघते ।)

सूत्रधारः—तत्त्वं बोधितवती । अथ वा ॥

नैतच्चित्रं ललितमधुरं धर्मराजस्य सूरे-
वाचां विस्फूर्जितमिति जगत्ख्यातविद्यावतारः ।
यस्य ज्यायाननुपसुरगुरौ रामनामा मनीषी
भाष्यं पातञ्जलमुपदिशन्भाति विद्वज्जनेभ्यः ॥

॥ किञ्च ॥

श्रीमच्छ्रीध्रुवकाश्यपान्वयमणिर्निर्णीतसर्वागमो
निर्वेलप्रथिताऽन्नदानजनुषा कीर्त्या जगद्भासयन् ।
यत्तातो भुवि वै...सुतो वैकुण्ठयोगीश्वरः
सद्यः संन्यसनेन चिद्घनसुधाम्भोधेरगादेकताम् ॥

तस्य खलु सकलादिगन्तरसन्ततचन्द्रातपायमानयशसो धर्मराजमनीषिणो हृदयानन्दनो नन्दनो वेङ्कटेश्वरनामा कवीन्द्रः । तेन हि निर्माय नाटकमिदं भगवतः पादाम्बुजयोः समर्पितमासीत् ।

End:

तथापीदमस्तु भरतवाक्यम् ॥

वाग्देव्या सममिन्दिरा विहरतां वर्षत्वपो वासवो
लोकस्यास्तु सुखाय नीतिनिरता रक्ष(न्तु) पृथ्वीं नृपाः ।
भूयासुश्च चिदम्बरे निवसतां पुत्रानुपुत्रश्रियः
चेतः खेलतु चित्सभापतिपदाम्भोजे जनानां सदा ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

॥ पञ्चमोऽङ्कः ॥

समाप्तमिदं सभापतिविलासं नाम नाटकम् । श्रीमच्चिदम्बरेशाय नमः ।

चिदम्बरेशार्पणमस्तु ॥

Subject: Sabhāpativilāsanāṭaka 1-5 acts.

Remarks:—The Ms. is in a decaying condition.

There is a paper transcript of this Ms. in this Library. See T. V. No. 54.

The author of this drama is Veṅkaṭeśa the son of Dharmarāja of Naidhruvakāśyapagotra. Veṅkaṭeśa is already familiar to us as the author of the Campukāvya called Bhosalavaṁśāvali, described under No. 4240 (Vol. VII Pages 3287-91.) The author was a protegé of Serfojee who ruled between 1711-1728 A. D.

The work deals with the greatness of Kanakasabhāpati the titular deity of Cidambaram, a famous place of pilgrimage in South India.

The work has not been printed so far.

॥ सीतानन्दम् ॥

4530. SĪTĀNANDAM.

Burnell's Catalogue No. 10666. Page 169. Left column. Substance—Palm leaf. Size—16 × 1⅜ inches. Leaves—117 Lines—5 to a Page. Script—Grantha. No. of Granthas—2400. Author—Tātārya. Incomplete.

Beginning:

यस्यानन्दे प्लवन्ते कचिदिव कणिका...र्ध्यमाणाः
सर्वेश(म्भु)स्वयम्भू प्रमुख.................. ।
यं गेयः श्रुतीनां मम हृदि सततं...सन्निधि...रा-
सीताभ्य(?)तावलोकैरुपाहितमहिमा रामनामा भिधामा ॥

(बान्धन्ते)

* *

सूत्रधारः ॥ (विचिन्त्य।) सकलभुवनतलललामभूतायां * अस्यां कुम्भकोणाभिधानायां महानगर्यां कोमलवल्लीसहचरस्यास्य देवस्य चैत्रोत्सवसेवा समागतैरत्रभवद्भिरा....रा।किल पञ्चहायनतया सङ्गतवचनग्रथनानाभिज्ञमपि निजगुणवर्णनसमौत्सुक्येन परिस्फुरदधरपल्लवं व्याहारकौशलमभिधाय च मा.... उत्तानपाददायादमतिवात्सल्येनानुगृह्य सञ्जातहर्षेण तथाविधदयनीयजनलुब्धतया पुनरपि तादृशजनं विच्छता! भगवता निजकृपापूरकिङ्करेण निगमान्तदेशिककृपाभरेण चिरादासाद्य समर्पिते स्वस्मिन्नेव प्रतिष्ठापितस्य निरवग्रहानुग्रहकल्पावनीरुहस्यातिमनोहरसुमनस्तबकायमानतया कर्णावतंसीभूय देवीहृदयमु(ल्ला)सयिष्यतीति कृताध्यवसायेनैव कविः रामसीतानन्दमिति कलितनामधेयं रसिकजनहृदयाधेयमभिनवं नाटकं............ ॥

* *

सूत्रधारः ॥ * तदवहितमाकर्णय ।

श्रीशैलवंशकलशोदधिलब्धजन्मा
सन्मार्गभूषणकरो भुवि श्रीनिधामा ।
आसीदशेषधरणीसुरवासमेरू-
रथ्यावधार्य गुरुराश्रितवासवद्भुः ॥

किञ्च ॥

साक्षादुपासामुपदेष्टुकामौ
पूर्वाग्रभागाविव पूर्ववाचाम् ।
यस्य श्रितौ तातकनिष्ठतातौ
श्रीमद्घनाद्रीश्वरतातयार्यौ ॥

अपि च ॥

त्र्यन्तधर्मपरिशीलनजागरूक-
माचार्यकं स्वयमिव श्रितमर्त्यभावम् ।
यस्यानुजो समजनि(?)तातगुरुर्वराया-
मौदार्यसम्पदिव मूर्तिमती मुरारेः ॥

तस्य किल तनयो मूर्त इव विनयो रमणीयमृदुलतरव-
चोभङ्ग्या * तातयार्यनामा प्रबन्धकविः ।
श्रीमत्तिरुमलाम्बा च शिङ्गमाम्बा च मातरौ ।
कारुण्यस्रोतसा चेतः कुर्वाते यस्य निर्मलम् ॥

End:

नटः (सहर्षम्, विलोक्य)

नृत्यन्त्यप्सरसः प्रमोदभरिताः गन्धर्वकन्याः कलं
गायन्त्युन्मदयन्ति सान्द्रनिनदैरन्त...मुखाः ।
केच...भिरञ्चितस्वा कुर्वन्ति सर्वा दिशः
सार्द्रं हृष्यति लोककृत्सहगिरा देव्याद्य रामो म . ॥
सर्वे कौशिकाज्ञया यथार्हं लक्ष्मणाद्यैरूर्मिलादीनां... ॥

Colophon: (Leaf No. 101.)

इति तातार्यकृतसीतानन्देऽष्टमोऽङ्कः ॥

Subject: Sītānanda 1-9 acts.

Remarks:—The Ms. is in a decaying condition. This Ms. abruptly ends towards the close of the 9th act. This is full of scriptorial errors.

The author of this drama, Tātārya, belonged to the family of the famous Tātācārya of old. He seems to have been a native of Kumbakonam, wherein the scene is laid. He was the son of one Vanādrīśvara, and seems to have lived in the 17th century.

The drama deals with the marriage of Sītā with lord Śrī Rāmacandra.

The work is not available in print.

॥ सीताविवाहम् ॥

4531. SĪTĀVIVĀHAM.

Burnell's Catalogue No 10665. Page 174. Left column. Substance—Palm leaf. Size—15⅜ × 1¼ inches. Leaves—61. Lines—6 to a Page. Script—Grantha. No. of Granthas—1800. Author—Śeṣādri. Complete.

Beginning:

....कोकपटलीचेतःप्रमोदोत्कर-

स्थेमाङ्कुरसुधारसो क्षणनिजप्रादुर्भवैस्ते करैः ।

प्रातः पङ्कजकोरकस्य....कृत्वा द्...क्रमा-

देनामेषपतिस्ततः स्ववशयत्वम्भोजिनीनां श्रियम् ।

(अष्टादशपदा कोकपङ्कजपदवती पन्येति पनुर्भङ्गसूचनं

श्रियं स्ववशयत्विति सीताविवाहसूचनम्)

(नान्द्यन्ते)

सूत्रधारः ॥ (समन्तादवलोक्य, सानन्दम् ।)
अहो रमणीयता वसन्तसमयस्य ।

* * *

भगवतः शार्ङ्गधन्वनो वरदराजस्य वसन्तोत्सवयात्राग्रामागताना...कमपि रूपकमभिनीयतां भवतेति ।

* * *

सूत्रधारः ॥ (स्मृतिमभिनीय) । अस्ति भारद्वाजकुलकलशजलधिसमुल्लासकरः प्राभाकराध्वरीन्द्र इति कलङ्कं विना पूर्णचन्द्रः ।

* * *

तस्य............. ....
शोषाद्रिनाम्ना कविना प्रणीत ।
सीताविवाहाभिधनाटकं यत्
न्यस्तं मयि प्राक्तदहं प्रयोक्ष्ये ॥

End :

विश्वा ॥ तथापीदमस्तु भरतवाक्यम् ॥

नृत्यतु देवी वाणी विदुषां रसनाग्ररङ्गमध्येषु ।
अपुनर्भवस्य लक्ष्मीः सिद्ध्यतु मे राघवप्रसादेन ॥

॥ अपि च ॥

देवी सस्यसमृद्धिमेतु वसुधा वर्षन्तु वाञ्छाधिकं
मेघा धर्मरता भवन्तु मनुजा पापे रतिर्मा स्म भूत् ।

भूयात्सौख्यमनारतञ्च विदुषां गोष्ठीषु सक्ता नृपा
जायन्तां धरणीसुराः कृतधियो वेदेषु शास्त्रेषु च ॥
(प्रशस्तिः शुभशंसनम्)
॥ इति निष्क्रान्ताः सर्वे ।

Colophon:

पञ्चमोऽङ्कः ॥
सीताविवाहं नाम नाटकं सम्पूर्णम् ॥

Subject: Sītāvivāhanāṭaka.

Remarks:—The Ms. is in a decaying condition.

Śeṣādri, the author of this drama, mentions one Prabhākarādhvarin in the Prastāvanā. Very probably this Prabhākara was an immediate ancestor of the author of the present drama. More about this author is unknown.

The drama deals with the story of the marriage of Rāma with Sītā. The work is not available in print.

॥ सुभद्राधनञ्जयम् ॥

4532. SUBHADRĀDHANAÑJAYAM.

Burnell's Catalogue No. 10700. Page 174. Left column.

Substance—Palm leaf. Size—$10\frac{7}{8} \times 1\frac{3}{4}$ inches. Leaves—83. Lines—8 to a Page. Script—Grantha. No. of Granthas—660. Author—Gururāmakavi. Complete.

Beginning:

श्रीरामाय नमः ॥

शम्भोः पञ्चसु वक्त्रेषु दीप्तिमन्मध्यमं नुमः ।
अघोरमपि यत्प्राहुरमतां निग्रहक्षमम् ॥

(नान्द्यन्ते)

सूत्रधारः ॥ अहो वेङ्कटगिरेरनुभावः ।

(विमृश्य) अस्ति किल काश्यपगोत्रस्य भगवतो गुरुरा-
मकवेः कृतिः सुभद्राधनञ्जयं नाम नाटकम् ॥ * *
अस्ति खलु तुण्डीरमण्डले मूलाण्डं नाम महानग्रहा-
रः ।

तत्र केचन वसन्ति काश्यपाः श्रोत्रिया धृतशिवार्चनव्रताः ।
यैरघोरशिवदेशिकादिभिः प्रत्यपादि परतत्त्वमैश्वरम् ॥
सार्वभौमकविप्राग्र्या वश्यवाचो बहुश्रुताः ।
गुणोत्तरतया सर्वे गुरून्सम्भावयन्ति यान् ॥
तेषामन्वयभूषणस्य तनुभूरेष स्वयम्भूर्गुरो-
दौहित्रः कवितानिरूढयशसः श्रीराजनाथस्य च ।
एनामप्यकरोत्कृतिं श्रितगुणग्रामः स रामः कविः
काव्यं कृष्णपरं व्यधाच्छिवपरं चम्पूप्रबन्धञ्च यः ॥

End:

तथापीदमस्तु भरतवाक्यम् ।

सद्वस्तुग्रथनाय तत्रभवतः शिल्पं विधेः कल्पतां
धर्मैकप्रवणार्थकामनिरता धात्रीभुजः सन्त्वमी ।
जायन्तां सुखिताः समग्रविभवारोग्यायुषः साधवः
जिह्वाग्रेषु च रोचनं कवयतां जागर्तु सारस्वतम् ॥

निष्क्रान्ताः सर्वे ॥

Colophon :

पञ्चमोऽङ्कः ॥ हरिः ॐम्

श्रीकृष्णाय नमः ॥

भद्रायास्तु सुभद्रा मे विजयं विजयः क्रियात् ।
बलाय बलदेवः स्याच्छ्रीपतिः कल्पतां श्रियै ॥

सभ्याः कृष्णधनञ्जयोज्वलकृतिं सम्भावयध्वं बुधाः
सह्रस्तुप्रणयेन मास्तु भवतां शङ्कोन्मुखं वाङ्मुखम् ।
अस्थाने यदि शङ्कतेयमनघा नान्येव सोढुं क्षमा
कौलीनं कुलदेवकिं कुलवधूं मुग्धा तितिक्षिष्यते ॥

साहित्यैहित्यमर्थप्रभवमभिनवां शब्दसन्दर्भबुद्धिं
व्युत्पत्तेः सिद्धिमग्र्या विविधरससुधास्रोतसागाधत्त्वम् ।
चित्रं शौरेश्चरित्रं किमपि रचयितुं चेतसा पारिषद्याः
यद्याशंसावतंसी कुरुत गुरुकुलोत्तंसरामप्रबन्धम् ॥

॥ शुभमस्तु ॥ श्रीरामाय नमः ॥

प्रतीतभाग्येऽत्र गुरुः स्वयम्भुवि
प्रसूतिमासाद्य गुरुः स्वयम्भुवि ।
गुणाभिरामो गुरुरामनामभाक्
प्रसन्नकाव्यप्रणयी तदद्भुतम् ॥

श्रीवाग्देव्यै नमः ॥

अनेकमिश्रान्वि मत्कर्ममान्यौ मातौ यतेतां प्रणयः स युक्तः(?) ।
अव्याजभक्तिमत्सुधामधुपत्र्यै मातर्नमस्ते मणिवर्णिकायै ॥

शुभमास्तु ॥

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्राय नमः ॥

Subject. Subhadrādhanañjayanāṭaka 1-5 acts.

Remarks:—The Ms. is in a fairly good condition.

Gururāmakavi the author of this drama, Subhadrādhanañjaya, seems to have baen a native of the North Arcot District and contemporary of the famous Appayya Dīkṣita and others. So his date falls in the opening decades of the 16th century.

The work deals with the story of the marriage of Dhanañjaya or Arjuna with Draupadī. The work is not available in print.

॥ सुभद्राधनञ्जयम् ॥

4533. SUBHADRĀDHANAÑJAYAM.

Burnell's Catalogue No. 10886 a. Page 118. Left column. Substance—Palm leaf. Size—14¼ × 1¼ inches. Leaves—13 (1-13). Lines—6 to a Page. Script—Grantha. No. of Granthas—195. Author—Gururāmakavi. Incomplete.

Beginning—Same as No. 4532.

End :

यतिः ॥ भवद्गुणा एव धर्मनन्दनं महानुभावमनुस्मा-
रयन्ति ॥

कृष्णः ॥ भगवन्

Colophon : (L. 9)

प्रथमोङ्कः ॥

Subject: Subhadrādhanañjaya 1-2 acts.

Remarks :—The Ms. is in a fairly good condition. The Ms. abruptly ends in the middle of the second act.

The other work contained herein seems to be some work on

1. Indian Logic. The opening verse

बालोऽपि यो न्यायनये प्रवेशमल्पेन वाञ्छत्यलसश्रुतेन ।

संक्षिप्य युक्त्यन्वितर्कभाषा प्रकाश्यते तस्य कृते मयैषा ॥

leads us to think that the work may be Tarkabhāṣāprakāśa.

2. Yogasūtra.

3. Some fragmentary leaves containing the opening portion of the Māgha.

॥ प्रकरणानि ॥

PRAKARANAS.

॥ अद्भुतदर्पणम् ॥

4534. ADBHUTADARPAṆAM.

Burnell's Catalogue No. 10699. Page 167. Left column. Substance—Palm leaf. Size—$15\frac{3}{8} \times 1\frac{1}{2}$ inches. Leaves—50. Lines—8 or 10 to a Page. Script—Grantha. No. of Granthas—1000. Author—Mahādeva. Incomplete.

Beginning:

हरिः ॐ ॥

श्रेयः श्रियो रसज्ञो
दद्यातु पुरुषोत्तमो भवताम् ।
जागर्ति यः पयोधौ
तारश्रुतरुणीजिघृक्षयेव पुनः ॥ १ ॥

End:

शूर्पणखा— एव्वं होदु । नेव । अहो बत देवी सीता ।
मदान्धरक्षोगृहवासदोषशङ्कानुसक्तेन रघूद्वहेन ।
त्यक्ता समक्षं महतो जनस्य त्यजत्यहो देहमिदं हुताशे ॥

(प्रविश्य) त्रिजटा, सरमा च—
हाइदीमि मन्दभाय आणि । (मुह्यतः) ।
शूर्पणखा—सहर्षम्............ ॥

Colophon: (Leaf No. 49)

नवमोऽङ्कः ॥

Subject: Adbhutadarpaṇa 1-10 Aṅkas 10th incomplete.

Remarks:—The Ms. is in a fairly good condition.

This drama has been published by the Nirṇayasāgara Press Bombay. The work deals with the story of the Rāmāyaṇa. Some Ālaṅkārikas and poets have held that Śṛṅgāra is the only sentiment out of which the rest have developed. Few others have given that place to Karuṇa; still others to Śānta. The present dramatist holds that Adbhuta should be regarded as the source of all sentiments. This may be styled as the Adbhuta Synthesis.

॥ बालरामायणम् ॥

4535. BĀLARĀMĀYAṆAM.

Burnell's Catalogue No. 5190. Page 169. Right column.

Substance—Paper. Size— × 8½ inches. Sheets—108. Lines—14 to 16 to a Page. Script—Devanāgarī. No. of Granthas—3640. Author—Rājaśekhara. Complete.

Beginning:

प्रसूते यः पात्रं तिलकयति यं सूक्तिरचना
य आद्यः स्वादूनां श्रुतिचुलकलेशेन मधुना ।
यदात्मानो विद्याः परिणमति यश्चार्थवपुषा
स गुम्भो वाणीनां कविवृषनिषेव्यो विजयते ॥

End:

॥ तथापीदमस्तु भरतवाक्यम् ॥

सम्यक् संस्कारविद्याविशदमुपनिषद्भूतमर्थाद्भुतानां
ग्रथ्नन्तु ग्रन्थबन्धं वचनमनुपतत्सूक्तिमुद्राः कवीन्द्राः ।
सत्त्वस्सन्तर्पितान्तःकरणमनुगुणं ब्रह्मविद्भिः........
यन्मूर्तं सात्त्विकैश्च प्रथमपिशुनितं भावयन्तोऽर्चयन्तु ॥ ११० ॥

॥ इति निष्क्रान्ताः सर्वे ॥

Colophon:

राघवानन्दो नाम दशमोऽङ्कः ॥

इति राजशेखरविरचितं श्रीमद्बालरामायणं नाम नाटकं सम्पूर्णम् ॥

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतश्रीरामचन्द्रार्पणमस्तु ॥

Subject: Bālarāmāyaṇa 1-10 acts.

Remarks:—The Ms. is in good condition. Alternate sheets are sulpherated.

This Prakaraṇa was composed by Rājaśekhara at the request of his pupil Mahendrapāla, king of Kānyakubja. Mahendrapāla's inscriptions dated in A. D. 893-907 are found and consequently Rājaśekhara should have flourished in the latter part of tha 9th and the beginning ot the 10th century.

The work is based upon the story of the Rāmāyaṇa and it is available in print having been published in Calcutta.

॥ बालरामायणम् ॥

4536. BĀLARĀMĀYAṆAM.

Burnell's Catalogue No. 5241. Page 169. Right column.
Substance—Paper.. Size—$12\frac{1}{4} \times 5$ inches. Sheets—95. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—3640. Author—Rājaśekhara. Complete.

Beginning, end, colophon and subject—Same as No. 4535.

Remarks:—The Ms. is in a fairly good condition.

The verses found after the colophon in the next Ms. (No. 4537) are found here also.

॥ बालरामायणम् ॥

4537. BĀLARĀMĀYAṆAM.

J. L. Collection No. 655. Substance—Paper. Size—11¾ × 4¾ inches. Sheets—185 Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—3400. Author—Rājaśekhara. Complete.

Beginning, end, colophon and subject—Same as No. 4535.

Remarks:—The Ms. is in good condition. After the colophon is given the following :

सौजन्याङ्कुरकन्दसुन्दरकथासर्वस्वसामन्तिनी-
चिन्ताकर्षणमन्त्र[म]कर्षवल्लभसरिद्कल्लोलवाग्वल्लभः ।
सौहार्दैक.. ....
.... ॥

यदा राम किदा संगं लस्खणं विअदंसणम् ।
लिहंदि मणिभित्तिवि बालरामअणं बुहा: ॥

कालुंमीलिअकेरवाअर दरिजंबंत कित्तलटा
वं वादं बरकेलि किसिकलिआदिप्पत्तदि कोटिणो ।
भाआअं लहदंसमौलिमणिनो रामं ससंगितणं
राआपीढकिअं मएत्थलिहिअं तं बालरामाअणे ॥

रइअं णिभरगुरुणा भरिअं चरिएण रामचंदस्स ।
बलिहइकसणेमहि अं णाउअमहि मुंतदिरससबंधम् ॥

श्री: ॥ सीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेतसकलपरिवारपतये
श्रीरामचन्द्राय नम: ॥

॥ बालरामायणम् ॥

4538. BĀLARĀMĀYAṆAM.

Burnell's Catalogue No. 5191. Page 169. Right column.

Substance—Paper. Size—$10\frac{1}{2} \times 5\frac{1}{2}$ inches. Sheets—40. Lines—12 to14 to a Page. Script—Devanāgarī. No. of Granthas—1200. Author—Rājaśekhara. Incomplete. Wants end.

Beginning—Same as No. 4535.

End:

(विचिन्त्य) । हंहो हृदय न विस्मर्तव्यम् ॥

यदावेदितममृतमयाक्षरं मायामयेन । यथा किल ।

Colophon : (13th Sheet)

भार्गवपुङ्गवो नाम चतुर्थोऽङ्कः ॥

Subject: Bālarāmāyaṇa 1-5 acts.

Remarks :—The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the fifth act.

॥ बालरामायणम् ॥

4539. BĀLARĀMĀYAṆAM.

Burnell's Catalogue No. 10589. Page 169. Right column.

Substance—Palm leaf. Size—$16 \times 1\frac{1}{4}$ inches. Leaves —182 Lines—7 to 8 to a Page. Script—Grantha. No. of Granthas—1000. Author—Rājaśekhara. Incomplete. (Wants in the middle)

Beginning, end, colophon and subject—Same as No. 4535.

Remarks :—The Ms. is in a fairly good condition. On the last

leaf is given

'नारोजीदीक्षितपुत्रस्य महादेवस्य पुस्तकं बालरामायणं'

Many leaves are missing in the middle.

॥ बालरामायणटीका ॥

4540. BĀLARĀMĀYAṆAṬĪKĀ.

Burnell's Catalogue No. 10590. Page 169. Right column. Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves —36 (172-207). Lines—7 to a page. Script—Grantha. No. of Granthas—800. Author—?. Incomplete.

Beginning:

प्रणुतादित्यको...नीराजिताङ्घ्रये ।
नमो निहन्त्रे विघ्नानां हेरम्बाय महात्मने ॥

अभिष्टुत्य महात्मानं राजशेखरसत्कविम् ।
बालरामायणस्याद्य टीका खलु विधीयते ॥

अनेन श्लोकेन कविराशिषमाशास्ते । प्रसत्तिः प्रसादः । प्रसिद्ध र्थतापादानाम् । प्रौढिविशेषपदार्थेषु झटिति प्रति- पत्तिजननशक्तिः । सा च पदद्वारेण पदसमुदायात्मकेष्व- प्यारोहति तद्वारेण वाक्यसमुदायात्मके वाणीनां गुम्भेऽपि — पात्रं निधिः तिलकयति भूषयति । सूक्तिरचना सुभाषितानां सन्दर्भः । आद्यः प्रधानः । स्वादूनां मधु- राणाम् । श्रुतिः श्रोत्रम् । चुलकं द्रवाधारः करतललेशेन आस्वाद्येन मधुना रसेन यदात्मनः स्व(?) देहाः विद्या शा- स्त्राणि परिणमति प्रगल्भते । अर्थवपुषाप्रतिपाद्यस्वरूपेण ।

गुँम्भ्यतेऽस्मिन्निति गुम्भः । वाणीनां संस्कृतप्राकृतादीनां वाचाम् । विजयते आशिषि गम्यमानायाः विपराभ्यां जेरित्यात्मनेपदम् । य एवंविधस्तस्य विजयमाशास्महे ॥

End:

मधातिलकस्य चन्द्रस्य नर्मदेति प्रतिवचनम् । नर्म ददातीति प्रतिवचनम् । नर्मदेत्येक उत्तरम् । नर्मदानामेत्यपरम् । इयमग्रे दृश्यते । इतोऽस्माकमार्यैः सुमन्त्रो निवृत्तः । अन्तरणाय आच्छादनाय । चूर्णिका उत्कलिका राजिका पद्मगन्धी गर्भचतुष्टयं गद्यरूपं........ ॥

Colophon: (Leaf No. 205)

नवमोऽङ्कः ।

Subject: Bālarāmāyaṇaṭīkā 1-10 acts.

Remarks:—The Ms. is in a fairly good condition. This Ms. abruptly ends in the middle of the tenth act.

The name of the commentator is unknown.

॥ मल्लिकामारुतम् ॥

4541. MALLIKĀMĀRUTAM.

Burnell's Catalogue No. 10678. Page 170. Left column. Substance—Palm leaf. Size—18⅛ × 1⅜ inches. Leaves—101. Lines—6 to a Page. Script—Telugu. No. of Granthas—3000. Author—Uddaṇḍa. Complete.

Beginning:

माङ्गल्यं वः क्रियासुर्मिलदटनिपुणस्थास्नुगीर्वाणभोगिश्रेणक्ष्यस्तकल्पद्रुमनवसुमनोनागहारावलीनि ।

नालीकाश्लिष्टलक्ष्मीकरचलनलिनोद्वान्तमाध्वीकधारा
विम्यत्फालेक्षणानि त्रिपुरहरधनुर्ज्यालताकर्षणानि ॥

॥ नान्द्यन्ते सूत्रधारः ॥

चूडाशीतकरस्तनन्धयसुधानीरन्ध्रगन्धिस्पृश-
स्क्रीडाकङ्कणपन्नगेश्वरमणेर्भीतावशिष्टा मुहुः ।
अङ्कासीनगिरीन्द्रजास्तनतटीहारावलीलोलनाः
सन्तापं शमयन्तु वो हरजटीगङ्गा तरङ्गाविला ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

भद्रं भजन्तु विश्वे भक्तिर्विष्णौ नृणां शिवे वास्तु ।
श्रौतः पन्था जयतु श्रीमन्तः सन्तु विद्वांसः ।

इति निष्क्रान्ताः सर्वे ॥

Colophon:

यद्दण्डं रङ्गनाथः सुतमजनत यं रङ्गदेवी तथाम्बा
त्रैविद्योशोमहर्षिर्निरवधिमहिमा यद्गिते जागरूकः ॥

तस्य श्रीविक्रमाज्ञाबहुमतिरचिते मल्लिकामारुताख्ये
मूर्धन्यो गां नवानां प्रकरणतिलके निष्कलङ्कोऽयमङ्कः ॥

यादृशं पुस्तकं + विद्यते ॥

Subject: Mallikāmāruta 1-10 acts.

Remarks:—The Ms. is in very good condition.

Uddaṇḍakavi, the author of this Prakaraṇa was the court poet of some chief at Calicut in Malabar. He was a contemporary of Bālakavi of Mullaṇḍram and flourished in the 17th century.

The work deals with the story of the marriage of one Malli-

kā with her lover Māruta and the magician Mandākinī pulls the strings. The work is an imitation of the Mālatīmādhava of Bhavabhūti. The work is available in print having been published from Calcutta.

॥ मल्लिकामारुतम् ॥

4542. MALLIKĀMĀRUTAM.

Burnell's Catalogue No. 10674. Page 170. Left column. Substance—Palm leaf. Size—16⅜×1¼ inches. Leaves —79. Lines—6 to 11 to a Page. Script—Grantha. No. of Granthas—3000. Author—Uddaṇḍa. Complete.

Beginning, end, colophon and subject—Same as No. 4541.

Remarks:—The Ms. is in a decaying condition.

॥ मालतीमाधवम् ॥

4543. MĀLATĪMĀDHAVAM.

Burnell's Catalogue No. 5182. Page 170. Right column. Substance—Paper. Size—9¼×4½ inches. Sheets—63. Lines—9 to 11 to a Page. Script—Devanāgarī. No. of Granthas—1400. Author—Bhavabhūti. Complete.

Beginning:

श्रीगणेशाय नमः ।

श्रीगुरुभ्यो नमः ।

चूडापीडकपालसङ्कुलगलन्मन्दाकिनीवारयो

विद्युत्प्रायललाटलोचनपुटज्योतिर्विमिश्रात्त्विषः ।

पान्तु त्वामकठोरकेतकशिखासन्दिग्धमुग्धेन्दवो
भूतेशस्य भुजङ्गवल्लिवलयस्रङ्नद्धजूटाजटाः ॥

End:

सन्तः सन्तु निरन्तरं सुकृतिनो विध्वस्तपापोदया
राजानः परिपालयन्तु वसुधां धर्मे स्थिताः सर्वदा ।
काले सन्तु च वर्षिणो जलधराः सन्तु स्थिराः पुण्यतो
मोदन्तां धनबन्धुबान्धवसुहृद्गोष्ठीप्रमोदाः प्रजाः ॥

Colophon:

एवमस्तु ॥ इति निष्क्रान्ताः सर्वे । दशमोऽङ्कः ॥
श्रीजगदम्बिकार्पणमस्तु । गोपालकृष्णाय नमः ॥

Subject: Mālatīmādhava 1-10 acts.

Remarks:—The Ms. is in good condition.

Bhavabhūti of Uttararāmacarita fame is the author of this Prakaraṇa. The drama deals with story of the love of Mālatī and Mādhava. One Kāmandakī works for the union and she is successful at the end.

Burnell's Catalogue No. 10651. Page 173. Right column. Substance—Palm leaf. Size—14¾×1½ inches. Leaves—34. Lines—5 to a Page. Script—Telugu. No. of Granthas—500. Author—Avadhānasarasvatī. Complete.

Beginning:

जेतुर्यस्य दिशां धनुस्तनुलतावामभ्रुवां कोकि....

...गषड्द्..........लिः शिञ्जिनी ।

...उत्पलप्रख्याः कटाक्षच्छटा

तस्याश्चर्यधनुर्धरस्य महिमा......... ॥

* * *

...कजासन नवनववैदिकालङ्कारस्य

भगवतः काञ्चीपुरेश्वरस्य....................

* * (सहर्षम्) आस्ते खलु समस्तविद्या-

मियोगसञ्जातप्रशस्तिरातिः कुलतिलकश्च ....

.. (अवधानसर)स्वती नाम कविः ॥

तस्य कृतिं शृङ्गारजीवनं नाम भाणं प्रयोगेन

दर्शयन्.........

End:

तथापीदमस्तु भरतवाक्यम् ।

ता(रुण्य)मस्तु सुदृशां सतताभिवृद्ध-

चन्द्रः समुल्लसतु सन्ततपूर्णबिम्बः ।

मासो मधुर्विहरतामनिशं वनेषु

(पुष्पायुधो) विजयतां भुवनैकवीरः ॥

Colophon:

इत्यवधानसरस्वत्याः कृतिः शृङ्गारजीवितं नाम भाणः

सम्पूर्णः ।

Subject: Śṛṅgārajīvana.

Remarks:—The Ms. is in a decaying condition.

The author of this bhāṇa is known as Avadhāna Sarasvatī. Nothing more is known of him. The bhāṇa is not available in print.

॥ शृङ्गारतिलकः ॥

4613. ŚṚṄGĀRATILAKAḤ.

Burnell's Catalogue No. 5295. Page 173. Right column. Substance—Paper. Size—9¾ × 3¾ inches. Sheets—62. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—950. Author—Rāmabadradīkṣita. Complete.

Beginning:

पाणिग्रहावसर एव दृढोपगूढा

रागस्पृशा रघुपतेर्नयनाञ्चलने ।

लज्जावशाज्नववधूरिव सङ्कुचन्ती
दृष्टिर्महीदुहितुरस्तु विभूतये वः ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

आचन्द्रार्कमिदं भवेदविरलं गोब्राह्मणेभ्यः शिवं
भूयस्त्वागमवृद्धसेविभिरियं राजन्वती राजभिः ।
लाल्यन्तां सरसोक्तयश्च कवयः शश्वद्रसज्ञैर्जनैः
स्यादेतस्य कवेश्च भक्तिरचला देवे रघूणां प्रभौ ॥

इति निष्क्रान्तः ॥

Colophon:

इति कौण्डिन्यकुलमण्डनरामभद्रकविवरविरचितः शृङ्गारतिलकं(को) नाम भाणः सम्पूर्णः ॥

Subject: Śṛṅgāratilakabhāṇa.

Remarks:—The Ms. is in good condition.

For detailed remarks on Rāmabhadra Dīkṣita, the reader is invited to the Introduction to this bhāṇa in the Nirṇayasāgara Edition and the article on Rāmabhadra in the Indian Antiquary, Vol. XXXIII.

॥ शृङ्गारतिलकः ॥

4614. ŚṚṄGĀRATILAKAḤ.

Burnell's Catalogue No. 5296. Page 178. Right column. Substance—Paper. Size—10¾ × 5½ inches. Sheets—25. Lines—12 to a Page. Script—Devanāgarī. No. of Granthas—950. Author—Rāmabhadradīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 4613.

Remarks: —The Ms. is in good condition.

॥ शृङ्गारतिलकः ॥

4615. ŚṚṄGĀRATILAKAḤ.

Burnell's Catalogue No. 5297. Page 173. Right column. Substance—Paper. Size—9½ × 4½ inches. Sheets—50. Lines—8 to 9 to a Page. Script—Devanāgarī. No. of Granthas—550. Author—Rāmabadradīkṣita. Incomplete. (wants end)

Beginning—Same as No. 4613.

End:

(निरूप्य) ॥ पश्य निपुणिके ।

उन्नम्रलोलफ............ ।

Subject: Śṛṅgāratilakabhāṇa.

Remarks:—The Ms. is in a fairly good condition.

॥ शृङ्गारभूषणम् ॥

4616. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 5272, Page 173. Right column. Substance—Paper. Size—10¾ × 4½ inches. Sheets—12. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—340. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning:

मैत्रीं येन मनोभुवो विरचयन्विश्वं जयत्यञ्जसा

येनोद्दीपनकारिणा विजयते शृङ्गारनामा रसः ।

रम्या यत्किरणाश्चकोरपरिषत्सौहित्यनाडिन्धमा
सोऽयं वः सुखमातनोतु जगतामानन्दनश्चन्द्रमाः ॥

End :

तथापीदमस्तु भरतवाक्यम् ॥

वेधो विष्णुमहेश्वरप्रभृतिभिः सम्भाविता निर्झरे
राज्ञां शम्बरशासनस्य महती लोकत्रये दीव्यतु ।
सत्स्वन्येषु रसेषु चास्तु विजयी शृङ्गार एको रसः
सत्साहित्स्तनमण्डलं मृगदृशां तारुण्यमुज्जृम्भताम् ॥

Colophon :

इति श्रीवामनभट्टभाणविरचितः भाणः समाप्तः ॥

Subject: Śṛṅgārabhūṣaṇabhāṇa.

Remarks:—The Ms. is in good condition. This No. is given by Dr. Burnell in the errata list.

Śṛṅgārabhūṣaṇa of Vāmana Bhaṭṭabāṇa has been printed by the Nirṇayasāgara Press, Bombay. For information regarding Vāmana Bhaṭṭa, please refer to the Introduction to Pārvatīpariṇaya, Śrī Vāṇi Vilās Edition.

॥ शृङ्गारभूषणम् ॥

4617. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 5278. Page 173. Right column. Substance—Paper. Size—$9\frac{1}{3} \times 4\frac{1}{2}$ inches. Sheets—15. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—345. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning, end and subject—Same as No. 4616.

Colophon:

इति श्रीवत्सकुलवामनभट्टबाणविरचित: शृङ्गारभूषणं नाम भाण:

समाप्त: ॥

Remarks:—The Ms. is in a fairly good condition.

॥ शृङ्गारभूषणम् ॥

4618. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 10638. Page 173. Right column. Substance— Palm leaf. Size—15 × 1⅛ inches. Leaves—12 (39-50). Lines—7 or 8 to a Page. Script—Grantha. No. of Granthas—300. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning, end, colophon and subject—Same as No. 4617.

Remarks:—The Ms. is in a fairly good condition.

॥ शृङ्गारभूषणम् ॥

4619. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 10639. Page 173. Right column. Substance—Palm leaf. Size—17 × 1½ inches. Sheets—11 (72-82). Lines—8 to a Page. Script—Grantha. No. of Granthas—300. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning, end, colophon and subject—Same as No. 4616.

Remarks:—The Ms. is in a fairly good condition. At the beginning there are a few lines from the end of the Vṛttaratnāvalī and after the colophon is given the beginning of the Acyutarāyābhyudayā.

नालीकाक्षमलीकाक्षं नागेशयमगेशयम् ।
विपुङ्गवध्वजं धाम पुङ्गवध्वजमाश्रये ॥

अन्यादपूर्वो निधिरागमाना-
माद्यो वृषाद्रेः पतिरच्युतेन्दुः ।
निरीक्षितुं निस्पृहकाङ्क्षितं ये
निरञ्जना एव जना भ्रमन्ते ॥

धम्मिल्लशैवलधरा विराज-
द्पाङ्गमीनाधरविद्रुमाप्ता ।
धन्या पितृच्छायतया.......
......श्रियमच्युतेन्दोः ॥

सुवर्णरूपैः शुभनायकार्कै-
रौज्वल्यवद्भिर्ध्वनिमद्भनुवानैः ।
परिष्कृतादिक्षितिपान् प्रभ...
.... ॥

॥ शृङ्गारभूषणम् ॥

4620. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 10650. Page 173. Right column. Substance- Palm leaf. Size—16½ × 1½ inches. Leaves—12. Lines—7 or 8 to a Page. Script—Telugu. No. of Granthas—300. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning, end, and subject—Same as No. 4616.

Colophon:

इति श्रीवत्सकुलतिलकवामनभट्टबाणविरचितशृङ्गारभूषणम् नाम

भाणः समाप्तः ।

श्रीकैलासाधिपाय नमः ॥ श्रीबृहदम्बायै नमः ॥ श्रीगुरवे नमः ॥

नवसंवत्सरचैत्रे मासि चतुर्थ्यां बुधस्य वारेऽस्मिन् ।

श्रीबालकृष्णविदुषा लिखितो भाणः स एव रसिकोऽभूत् ॥

Remarks:—The Ms. is in good condition. The Ms. was copied by Bālakṛṣṇa.

॥ शृङ्गारभूषणम् ॥

4621. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 10641. Page 173. Right column. Substance—Palm leaf. Size—14½ × 1¼ inches. Leaves—18. Lines—7 or 8 to a page. Script—Grantha. No. of Granthas—300. Author—Vāmanabhaṭṭabāṇa. Complete.

Beginning, end, colophon and subject—Same as No. 4616.

Remarks:—The Ms. is in a decaying condition.

॥ शृङ्गारभूषणम् ॥

4622. ŚṚṄGĀRABHŪṢAṆAM.

Burnell's Catalogue No. 5274. Page 178. Right column. Substance—Paper. Size—9½ × 3¾ inches. Sheets—12. Lines—7 to a Page. Script—Devanāgarī. No. of Granthas—170. Author—Vāmanabhaṭṭabāṇa. Incomplete.

Beginning and subject—Same as No. 4616.

End:

वाचालमञ्जीरमनोहरेण

पादेन पद्मोदरकोमलेन ।

वक्षःस्थले ताडनमाचरन्त्या

वराङ्गि सोऽयं क्रियतामशोकः ॥

सखे धनमित्र । इतः

Colophon : Nil.

Remarks:—The Ms. is in a good condition.

॥ शृङ्गारस्तबकः ॥

4623. ŚṚṄGĀRASTABAKAḤ.

Burnell's Catalogue No. 5298. Page 173. Right column. Substance—Paper. Size—9¾ × 4⅓ inches. Sheets—32. Lines—11 to a page. Script—Devanāgarī. No. of Granthas—930. Author—Nṛsimha. Complete.

Beginning:

भद्रं स वो दिशतु भक्तजनासपक्ष-

श्चिक्षाकृते सपदि पञ्चमुखायमानः ।

लक्ष्म्याः पयोधरतटीपरिरम्भलोभा-

दूरीचकार मुखमात्रमृगेन्द्रतां यः ॥

(नान्द्यन्ते)

सूत्रधारः ॥ आदिष्टोऽस्मि भर्मभयनिर्मलहर्म्यतलनिर्मितसु-

दतीगीतिरीतिनिशमनसमयपरवशविरिञ्चविस्मीकृत-

प्रपञ्चविधानां निधानाधिकविपुलनिलयवलयकलित-

नीलोपलजलोदरसरविस्पृहविभापटलाघनघनाघनता-

ण्डवितशिखण्डिमण्डलां * * सकलवस्तुसं-

निधानमधुरां मधुरां नाम नगरीं सनाथीकुर्वतो मैथिली-

लक्ष्मणसततपरिभूषितपार्श्वयुगलस्य * रामभद्रस्य श्री-
ष्मसमययात्रामहामहवन्दनानन्दबृन्दीभवत्या समस्त-
श्लाघ्रकनकानिकषदृषदा परिषदा * *

शेषः प्रादुरभूदशेषपुरुषप्रोज्जीवनाय स्वयं
यत्र श्रीरमणाज्ञया स भगवान् श्रीभाष्यकारात्मना ।
विद्वन्मौक्तिकपुञ्जनिर्भरगुणग्रामाभिरामान्तरैः
. . . . ॥

. . . .
कुञ्जरपुञ्जनकलाचातुर्यक्रमः... ।
आम्नाये गहनेऽप्यनर्गलगतिर्हारीतगोत्रोदितः
जायान्यस्य हितश्रुतप्रदगुरुर्भ्राता नृकण्ठीरवः ॥

तस्य खलु ॥

प्राप्तसाहित्यसौहित्यसूनुः सानुजमण्डलः ।
नृकण्ठीरव इत्याख्या यस्य प्रख्यातिमश्नुते ॥

* * *

सोऽयं विचित्रसन्दर्भं शृङ्गारस्तबकाभिधम् ।
भाणं बभाण साम्यजनवाणगणायितम् ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

श्रेयःप्रदैरिह सुखैर्धरणीसुरेन्द्राः
सम्प्रीणनं क्रतुभुजा मुहुराचरन्तु ।
श्रीरामचन्द्र इव सान्द्रगुणो नरेन्द्रो
विश्वम्भरा भवतु विश्रुतदानकीर्तिः ॥

Colophon:

इति ह(ा)रीतकुलतिलकवैदिकसार्वभौमश्रीनृसिंहविरचितः शृङ्गारस्त-
बकाभिधो भाणः सम्पूर्णः ॥

Subject: Śṛṅgārastabaka.

Remarks:—The Ms. is in a fairly good condition.

Nṛsimha, a Śrīvaiṣṇava author is the composer of this bhāṇa. He belonged to Hārītagotra.

॥ शृङ्गारस्तबकः ॥

4624. ŚṚṄGĀRASTABAKAḤ.

Burnell's Catalogue No. 5299. Page 173. Right column. Substance—Paper. Size—12 × 5½ inches. Sheets—83. Lines—10 to 13 to a page. Script—Devanāgarī. No. of Granthas—930. Author—Nṛsimha. Complete.

Beginning, end, colophon and subject—Same as No. 4623.

On the title page and after the colophon is given

सर्वविद्यानिधानकवीन्द्रचार्यसरस्वतीनां शृङ्गारस्तबकभाणः ।

संवत् १७४० चैत्रशुद्ध

Remarks:—The Ms. is in a fairly good condition.

The Ms. is dated Saṃvat 1740 corresponding to A. D. 1682.

॥ शृङ्गारसर्वस्वम् ॥

4625. ŚṚṄGĀRASARVASVAM.

Burnell's Catalogue No. 5275. Page 173. Right column. Substance—Paper. Size—9¾ × 3¾ inches. Sheets—39.

Lines—7 to 10 to a Page. Script—Devanāgarī. No. of Granthas—480. Author—Nallābudha. Complete.

Beginning:

श्रीगणेशाय नमः ॥

विष्णुब्रह्मपुरन्दरादिविबुधैः सान्द्रे विवाहाङ्गणे
प्रेमावेशवशात्परस्परहठाश्लेषे धृतोत्कण्ठयोः ।
गौरीशङ्करयोः ससम्भ्रममणीपीठाधिरोहे मिथः
सङ्घर्षेण समुद्गतः पुलकसम्भारः शिवायास्तु नः ॥

End:

॥ तथापीदमस्तु भरतवाक्यम् ॥

श्रीवाचौ कुरुतां महत्सु विहृतिं त्यक्त्वा विरोधं समं
भूयः किञ्च मिलन्तु मङ्गलचया गोब्राह्मणेभ्योऽनिशम् ।
भूपैर्नीतिपदानुसाररसिकैर्भूरस्तु राजन्वती
भूयादस्य कवेश्च शङ्करपदध्यानानुरक्तं मनः ॥

प्रागेव विंशद्वयसः प्रबन्धा नल्लाकवीन्द्रेण सुधीश्वरेण ।
शृङ्गारसर्वस्वमिति प्रतीतः सन्दर्भितोऽयं सरसः प्रबन्धः ॥

Colophon:

इति श्रीकौशिककुलजलधिराकासुधाकरश्रीबालचन्द्रमखिनो वरतनूभव श्री[नल्लाबुधकविशेखरतनूभव]नल्लाबुधकविशेखरविरचितः शृङ्गार-सर्वस्वं नाम भाणः सम्पूर्णः ॥

Subject; Śṛngārasarvasva.

Remarks:—The Ms. is in a fairly good condition.

Nallākavi the author of this bhāṇa was the son of Bālacandra Makhin and a near kinsman of Rāmabhadra Dīkṣita. He was an younger contemporary of Rāmabhadra Dīkṣita. For other particulars regarding Nallābudha, refer to the Indian Antiquary Vol. XXXIII.

This bhāṇa has been published by the Nirṇayasagara Press, Bombay.

॥ शृङ्गारसर्वस्वम् ॥

4626. ŚṚṄGĀRASARVASVAM.

Burnell's Catalogue No. 10650. Page 173. Right column. Substance—Palm leaf. Size —15¾ × 1¼ inches. Leaves—47. Lines—5 to a Page. Script—Grantha. No. of Granthas—700. Author—Vedāntārya. Complete.

Beginning:

श्रियै नमः ॥

श्रीरङ्गराजपादाब्जमकरन्दमधुव्रतम् ।
कर्मणा मनसा वाचा यतिशेखरमाश्रये ॥

* * *

(नान्द्यन्ते)

सूत्रधारः ॥ * भो भोः साभोगनिजविलासभोभूयमानरक्षणविचक्षणकटाक्षस्य * वेङ्कटाचलावासस्य भगवतः श्रीनिवासस्य वसन्तमहोत्सवारम्भविजृम्भमाणवैभवसम्भावनाय * * मणिमण्टपमध्यास्तेऽनितरसामान्यसौजन्यधन्या रसिकमूर्धन्याः ।

* * *

सूत्रधारः ॥ (सविमर्शम्) अस्ति खलु भरद्वाजकुलतिलकः खलवादिकुलवातूलवाधूल श्रीनिवास(गु)रुकरुणाकटाक्षको वेङ्कटरामार्यनामा सुधीसुत्रामा ॥

मुक्तागुच्छमिषाद्यशो वहति यो मूर्ताविशुद्धैर्गिरा
मष्टासु प्रथितो दिशासु विभवैरष्टावधानी कविः ।
तस्यायं तनयश्चतुर्नयपथोद्दामस्फुरन्मिर्णयो
वेदान्तार्गसुधीमणिर्विजयते विद्वत्कवीन्द्राग्रणीः ॥

मारिषः ॥ स किल सुधीः सर्वतन्त्रस्वतन्त्रमतिरिति यते । कथमस्य कमनीयकवनपथप्रावीण्यम् ।

सूत्रधारः ॥ (विहस्य ।) विज्ञायते किल भवता

श्रीपत्यन्वयपद्मतिग्मकिरणश्रीसूर्यनारायणः
भ्राता कोविदगन्धसिन्धुरततेयज्वा यवीयो गुरुः ।
भव्यश्रीरनवद्यहृद्यकविता पाण्डित्यपाथोनिधिः
पाण्ड्यक्षोणिपतेरयं प्रियसखः पट्टाभिरामः प्रभुः ॥

मारिषः ॥ (सरोषम्) पर्यनुयुङ्क्ते भवान् प्रबोधयितारं सर्वजगतां परिपचेलिमं भागधेयं पद्मिनीनां प्रकाशिताशेषभुवननिकरं प्रतिदिनोदयपरिष्कृतोदयसानुमन्तं भानुमन्तमपि भवान् जानीते न वेति । स हि समधिकवितरणविभवनिर्जितकर्णः सकलबुधावनलब्धवर्णः सद्गुणसमुद्ररामभद्रसेनाधिनाथसोदरः समाश्रितजनसोदरः पदकमलना... परिपन्थिमण्डलः पाण्ड्यधरामण्डलं परिपालयति ॥

* * *

सूत्रधारः ॥ (सादरम्) । काव्यप्रकाशिकादिग्रन्थोपधि-

सिन्धुमन्थमन्थानःपट्टाभिरामयविभुः । परितुष्यति सोऽप्यस्य कविताभिः ।

मारिष ॥ परीक्षकजनपरिगृहीतस्य मणेः किं नाम परीक्षान्तरम् ॥

सूत्रधारः ॥ तस्य कृतिं शृङ्गारसर्वस्वं नाम भाणमभिनीय सभाजनममुं सभाजयामि ॥

End:

तथाप्येतदस्तु भरतवाक्यम् ॥

सरसकवनशक्तिर्जायतां पण्डितानामभिमतघटनै स्तामाद्रियन्तां नरेन्द्राः ।
अधिवसतु च तेषामन्वयानब्धिकन्या
शिशिरयतु च लोकान्श्रीनिवासः कटाक्षैः ॥

Colophon:

अमोदयत्वशेषान्श्रीमान्वेदान्तदेशिकसुधी यः ।
भाणितमधुरमभाणीद्वाणं शृङ्गारसर्वस्वम् ॥

हरिः ॐम् ॥ श्रीमते रामानुजाय नमः ॥

श्रीरङ्गनायक्ये नमः ॥

अष्टावधानवेदान्तशिष्टेष्टकृतिषूल्लिखन् ।
अष्टैश्वर्यप्रदं भाणमिष्टसिद्धिमवाप्नुयाम् ॥

Subject: Śṛṅgārasarvasvabhāṇa.

Remarks :—The Ms. is in a fairly good condition.

The Śṛṅgārasarvasvabhāṇa was intended to be staged on the occasion of the Vasantotsava of Śrīnivāsa at Tirupati.

The author Vedāntārya seems to have been a native of

Madura. He was the son of Venkaṭārya of Bhāradvāja gotra and his father's teacher was Śrīnivāsārya of Vādhūla gotra. The author says that he was the pupil of Sūryanārāyaṇa of Madura. The reference to Rāmabhadra Nāyaka leads us to the conclusion that the author should have flourished at the beginning of the 16th century. The bhāṇa is not available in print.

॥ प्रहसनानि ॥

PRAHASANAS.

॥ उन्मत्तकविकलशप्रहसनम् ॥

4627. UNMATTAKAVIKALAŚAPRAHASANAM.

Burnell's Catalogue No. 10659. Page 167. Right column. Substance— Palm leaf. Size—18 × 1¼ inches. Leaves—19. Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—240. Author—Veṅkaṭeśvara. Complete.

Beginning:

श्रीविद्यारामाय नमः ॥

कल्याणमावहतु ते गणनायकस्य
कामध्वजः प्रियतमां दधतोऽङ्कमध्ये ।
स्वस्याधिकारहरणादपराधिनोऽपि
सच्छात्रतां भजति यः करपुष्करस्य ॥

* * *

नान्द्यन्ते सूत्रधारः ॥

सूत्रधारः ॥ (सानन्दम् ॥) अहो बहोः कालादानुलोम्य-
मवलम्ब्यते शैलूषपरिषिदभिलषितेन दैवेन ।

विषमविशिखविद्याद्वैतसिद्धा(न्त)सीम्नां
विटसदसि विचित्रैर्विश्रुतानां चरित्रैः ।
अभिरूपरमृगाक्षी योगवैज्ञानिकाना-
महह धुरि जनानामद्भुतोऽयं समाजः ॥

तदेवेषां पुरः किमपि रूपकमभिनेतव्यमस्माभिः । (प-
रिक्रम्यावलोक्य ॥) अये परिषदः सकाशाद्रंगावतंस इत

एवाभिवर्तते । (प्रविश्य) ॥

नटः ॥ भाव मन्मुखेन भवन्तमादिशन्ति सामाजिकाः हास्यरसप्रायेणादृश्यसादृश्येन केनापि दृश्येन वयं विनोदनीया इति । किम्पुनस्तादृशं दृश्यम् ॥

सूत्र ॥ (विचिन्त्य) । (सहर्षम् ।) हस्तगतमाणिक्यमापणे गृग्यते ! ननु निर्दिष्टगुणविशिष्टमसदृश एव कवेरकुमारिकातरलतरङ्गताण्डवितशीकरासारशीतलोपशल्यमणल्लूरग्रहारहारनायकमणेः षड्दर्शनीसागरनिशाकरस्य षड्भाषासार्वभौमस्य प्रतिदिनप्रबन्धनिर्माणपरमेश्वरस्य धर्मराजमनीषिणो भागधेयपरिणामेन वेङ्कटेश्वरकविना गृहीतवस्तु विरचितमुन्मत्तकविकलशं नाम कृतं सकलहृदयानन्दविकसनम् प्रहसनम् ।

* * *

तादृशानप्यपथि प्रवर्तयन्ति ॥ उक्तञ्च तेन कवितुरासाहा ।

अनृतानि सत्यलेशैः शबलानि पदे पदे सन्ति ।
यदि शुद्धमनृतमिष्टं कविकलशस्यान्तिकं व्रजत ॥
कलशं कविमाश्रित्य यत्किञ्चिल्लब्धुमिच्छति ।
शशशृङ्गं स सङ्गृह्य करण्डङ्कर्तुमीहते ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

साधुषु विवेकमत्यो योगो गाढः शुनो रत इवास्तु ।
त्वकुरिभशेफ....नुमिव दैर्घ्यं मत्यीयुषा सदा भूयात् ॥

(इति परिक्रम्य) निष्क्रान्ताः सर्वे ॥

Colophon:

समाप्तमिदं प्रहसनम् ॥

पुण्यश्लोककथासुधालहरिभिः सिक्तामनीषावतां

वाणीगर्भचरित्रकीर्तनभुवा दोषेण ह्यास्लिष्यते (?) ॥

Subject: Unmattakavikalaśaprahasana.

Remarks:—The Ms. is in a decaying condition.

Venkaṭeśvara, the author of this prahasana is identical with the author of the Bhosalavaṃśāvali and Sabhāpativilāsa Nāṭaka, described already under Nos. 4240 and 4529. This is another work of the same author. The work is not available in print.

The Sanskrit Prahasana resembles to a remarkable degree the farce in the English language. The main purpose is to excite laughter through an appeal to the ludicurous. To a very large extent the Prahasanas successfully delineate that theme and the laughter engendered is too much in certain cases. The comic turns out to be vulgar in certain cases.

॥ उन्मत्तकविकलशप्रहसनम् ॥

4628. UNMATTAKAVIKALAŚAPRAHASANAM.

Burnell's Catalogue No. 5807. Page 167. Right column. Substance—Paper. Size—12×5 inches. Sheets—8. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—128. Author—Venkaṭeśvara. Incomplete. (Wants end)

Beginning—Same as No. 4627.

End:

शिष्यः । इदो कोऽपि देसाहिआरी सांघो (?) पमाअच्छइ ॥ (इतः कोऽपि देशाधिकारी साटोपमागच्छति ॥)

Colophon: Nil.

Subject: Unmattaprahasana.

Remarks:—The Ms. is in good condition.

॥ चण्डानुरञ्जनम् ॥

4629. CAṆḌĀNURAÑJANAM.

T. S. Collection No. 1136. Substance—Paper. Size—12 × 5 inches. Sheets—17. Lines—11 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Ghanaśyāma. Incomplete.

Beginning:

श्रीशिवाय नमः ॥

वस्तु विस्मयकृत्किञ्चिदस्तु वो भूरि भूतये ।
दृश्यते साम्ि यत्कामदण्डकन्दर्पमन्दिरे ॥ १ ॥

॥ किञ्च ॥

स्वच्छायाविषमीकृतम्बुधिकको दावाग्निरापत्तरो-
रुद्भूतानिशजङ्गपूकथमिनां चूतप्रियाभ्यर्हितः ।
शष्पक्षोणिषु गानयन्करुणया कृष्णोण्डजेशान्वितः
पायात्सो निभृतप्रजापतिभगस्वर्णाप्यवर्णाकृतिः ॥ २ ॥

॥ अपि च ॥

चोराणां मलमल्लकेऽपि वशगे पत्रच्छदायाविश-

मर्यां भेकधियात्रमर्दधृतदुःश्रेफाः प्रतीरं भजन् ।

पश्चात्फेरुगृहीतलम्बिवृषणो दैवात्सदैवागतैः

स्यालैर्हासखिलीकृतो वनपथे पान्थोजनः पातु वः ॥ ३ ॥

(पुनः समाधाय)

अखण्डावः प्रीतीरतिसृजतु सुम्भस्य मसृणं

महाश्रेफो द्वीपोद्भवकदलिकाण्डप्रतिभटम् ।

यदारुह्य स्वैरोन्नयननमनं कौतुकधिया

घटीयन्त्रक्रीडामनुभवति सायं वटुजनः ॥ ४ ॥

* * *

(नान्द्यन्ते)

अलमलं हिडिम्बासुरश्रेफोतिदीर्घया नान्दीविपाटप्रहे-
लिकया । (परिक्रम्य) । (सामाजिकान्प्रति सादरस्मितम्)

क्वापि क्षोणिबिले स्मरध्वजगदां कृत्वोत्थितां घर्षरां

निद्रालोर्निशितुम्बशङ्किहृदयेनान्तःस्थितेनाखुना ।

तस्यां गाढमरूकृतस्य रदनैः कस्यापि सन्यासिनः

सोत्स्वप्नश्च भयाकुलश्च सहसा बोधोऽस्तु हासायनः ॥ ७ ॥

* * *

सूत्रधारः ॥ (ससाध्वसानन्दम्) आर्ये सभ्यजनानुचि-
तमपि तावकं प्रहसनं मह्यमुपकरोति ।
यदिदानीं प्रहसनस्य प्रयोक्त्रा मया भवितव्यमिति सं-
सूचितोऽस्मि ॥

नटी ॥ किंणामहेअं तं ॥

सूत्रधारः ॥ चण्डानुरञ्जनं नाम ।

नटी ॥ कोणु तस्स कई ।

सूत्रधारः ॥ आर्ये ननु पृष्टे प्रबन्धनामनि प्रबन्धृनामापि स्वयमेव कथयेयम् । कुतः पुनः पृच्छयते । न खलु साधिते कुचालिङ्गने पुनः प्रष्टव्यमधरचुम्बनं प्रति ।

नटी ॥ माणद अत्थुदे चादुचि झत्ति कहीअदु (?) । कोणु कई ।

(नेपथ्ये)

यस्येशो + वर्णान्वितः ॥

॥ अपि च ॥

पद्रुषड्भाषाकाव्यं नाटकभाणौ च सट्टकं चम्पूः ।
अन्यापदेशशतकं रचितं येनाशु खेलेन ॥ १० ॥

End:

व ॥ (सानन्दम्) । नन्वनुकूल एव सायोन्मेषः । नैषदीक्षितवराको यद्मादपि सखायमनगमिष्यते योषिन्नेपथ्यधरम् ॥

लं ॥ यत्सत्यम् ॥

दि ॥ सखे स्वयमुपेत्य वन्दनयिस्त्वयायम् । यतः समयभेदे रासभोऽपि वन्द्य इति वदन्ति विपश्चितः ॥

मा ॥ ....

Subject: Caṇḍānurañjana Prahasana.

Remarks :—The Ms. is in a fairly good condition.

This Prahasana is by Ghanaśyāma and the work is not available in print.

॥ धूर्तसमागमम् ॥

4630. DHŪRTASAMĀGAMAM.

Burnell's Catalogue No. 5302 b. Page 169. Left column. Substance—Paper. Size—$9\frac{3}{8} \times 3\frac{3}{4}$ inches. Sheets—25 (35–59). Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Jyotirīśvara. Complete.

Beginning :

हर्षादम्भोजजन्मप्रभृति दिविषदां संसदि प्रीतिमत्वात्
शम्भन्मौलौ पुरारेर्दुहितृपरिणये साक्षतं चुम्बमाने ।
तद्वक्त्रं मौलिवक्त्रे मिलितमिति भृशं वीक्ष्य चन्द्रः सहासो
दृष्ट्वा तद्विस्मयमाशु स्मितसुभगमुखः पातु वश्चन्द्रचूडः ॥

End :

तथापीदमस्तु ।

काले सन्ततवर्षिणो जलमुचः सस्यैः समृद्धा मही
भूपाला निजधर्मपालनपरा विप्रास्त्रयीनिर्भराः ।
स्वादुक्षीरनतोधसः प्रतिदिनं गावो निरस्तापदः
सन्तः शान्तिपरा भवन्तु सुखिनः सौजन्यभाजो जनाः ॥

॥ इति निष्क्रान्ताः सर्वे ॥

Colophon :

द्वितीयः सन्धिः ॥

इति श्रीकविशेखराचार्यश्रीज्योतिरीश्वरविरचितं धूर्तस-

मागमं नाम प्रहसनम् ॥ इति साम्बशिवार्पणमस्तु ॥

Subject: Dhūrtasamāgama Prahasana 1-2 sandhis.

Remarks:—The Ms. is in very good condition. The other work contained herein is:

वान्दुरापरिणयम्

The author of this farce, Dhūrtasamāgama is one Jyotirīśvara Kaviśekhara His father was Dhaneśvara and his grandfather Rāmeśvara. This family seems to have been patronised by the Vijayanagar king Narasimha (A. D. 1487-1507.) The farce therefore belongs to the 16th century.

As the name itself indicates a number of villains, five in number, run after a lady, each to possess her.

The farce has been edited by Prof. Lassen in Bonn and later on in the Nirṇayasāgara Press, Bombay.

॥ धूर्तसमागमम् ॥

4631. DHŪRTASAMĀGAMAM.

Burnell's Catalogue No. 5301 b. Page 169. Left column. Substance—Paper. Size—9¾ × 4 inches. Sheets—12 (16-27). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas —250. Author—Jyotirīśvara. Complete.

Beginning, end colophon and subject—Same as No 4630.

Remarks:—The Ms. is in good condition. Alternate sheets are sulpherated.

The other work contained herein is

वन्दुरापरिणयम् ॥

॥ धूर्तसमागमम् ॥

4632. DHŪRTASAMĀGAMAM.

Burnell's Catalogue No. 5303. Page 168. Right column and 169 Left column. Substance—Paper. Size—11 × 4¾ inches. Sheets—6. Lines—15 or 16 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Jyotirīśvara. Complete.

Beginning, end, colophon and subject—Same as No. 4630.

Remarks:—The Ms. is in a fairly good condition.

॥ भानुप्रबन्धम् ॥

4633. BHĀNUPRABANDHAM.

Burnell's Catalogue No. 5304. Page 169. Right column and 170 Left column. Substance—Paper. Size—9½ × 4⅛ inches. Sheets—44. Lines—6 or 7 to a Page. Script—Devanāgarī. No. of Granthas—500. Author—Venkaṭeśvara. Complete.

Beginning:

श्रीगणेशायनमः ॥

लम्बोदरस्य विगलत्कटिसूत्रलम्बि-

कौपीनपार्श्वविवृतो मदनध्वजोऽभ्यात् ।

यं सम्भ्रमादुपसरन्नुरगभ्रमेण

चञ्च्वा विकर्षति षडाननयानबर्ही ॥

॥ अपि च ॥

अलमखिलसुरेन्द्रैरस्तु पुत्रप्रदं वो
गुरुतरमतिदीर्घं कुम्भकर्णस्य शेफः ।
अहनि निशि च यस्योज्जृम्भणे विन्ध्यबुद्धया
कलशजमृषिमुच्चैः क्रन्दतश्चन्द्रसूर्यौ ॥

End:

तथापीदमस्तु भरतवाक्यम् ।

भूपाः पुण्यपथे चरन्तु भवतु क्षेमं नृणां सर्वतः
कालेष्वोषधयः फलन्तु कवयः खेलन्तु राज्ञां प्रियाः ।
कौण्डिन्यान्वयमण्डनाय जनितश्रीदक्षिणामूर्तिना
काव्यस्यास्य च वेङ्कटेश्वरकविः कर्ता चिरञ्जीवतु ॥

Colophon:

प्रहसननाटकं सम्पूर्णम् ॥

श्रीगुरुभ्यो नमः ॥

आनन्दवल्लिदेव्याः करुणारसमेदुरा कटाक्षोर्मिः ।
भोसलकुलमणिदीपं सुखयतु शाहाधिपं नित्यम् ॥

Subject: Bhānuprabandhaprahasana.

Remarks:—The Ms. is in good condition.

Venkaṭeśa, the author of this prahasana is probably the same as the commentator on the Patañjalicarita of Rāmabhadra Dīkṣita, described under No. 3827. Vol. VI.

The verse after the colophon clearly indicates that the author was attached to the Tanjore court.

The farce is not available in print.

॥ भानुप्रबन्धम् ॥

4634. BHĀNUPRABANDHAM.

Burnell's Catalogue No. 5305. Page 169. Right column.

Substance—Paper. Size—10¾ × 4½ inches. Sheets—24. Lines—10 to a page. Script—Devanāgarī. No. of Granthas—500. Author—Veṅkaṭeśvara. Complete.

Beginning, end, colophon and subject—Same as No. 4633.

Remarks:—The Ms. is in good condition.

॥ भानुप्रबन्धम् ॥

4635. BHĀNUPRABANDHAM.

Burnell's Catalogue No. 5308. Page 170. Left column.

Substance—Paper. Size—11¾ × 4½ inches. Sheets—26. Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—450. Author—Veṅkaṭeśvara. Incomplete.

Beginning:—Same as No. 4633.

End:

मया च राजकारि.... माणेन न सर्वेऽपि पौराः प्रति-
नन्दिताः दीर्घदन्तादयः । किमितो—

Colophon: Nil.

Subject: Bhānuprabandhaprahasana.

Remarks:—The Ms. is in a very good condition.

॥ भानुप्रबन्धम् ॥

4636. BHĀNUPRABANDHAM.

Burnell's Catalogue No. 10660. Page 170. Left column.

Substance—Palm leaf. Size—$12\frac{1}{2} \times 1\frac{1}{4}$ inches. Leaves—27. Lines—6 to a Page. Script—Grantha. No. of Granthas—450. Author—Veṅkaṭeśvara. Incomplete.

Beginning, end and subject—Same as No. 4635.

Remarks:—The Ms. is in a fairly good condition.

॥ योगानन्दम् ॥

4637. YOGĀNANDAM.

Burnell's Catalogue No. 10658. Page 171. Right column. Substance—Palm leaf. Size—$15\frac{1}{2} \times 1$ inches. Leaves—33. Lines—3 or 4 to a Page. Script—Grantha. No. of Granthas—300. Author—Aruṇagirinātha. Complete.

Beginning:

हरिः ओं । शुभमस्तु ॥

करुणापरिपूर्णाय कलभाननलक्ष्मणे ।
आविशेषाय शिवयोगानन्दग्रन्थये नमः ॥ १ ॥

पूर्वं पूरितरेतसाऽशिखिमुखे शर्वादभूयस्ततः
शौरेस्स्त्रीवपुषस्सरोजजनुषः पश्चात्सुताकामिनः ।
स्वाराजस्तदनन्तरं मुनिवधूजारादथ प्रोद्गत-
श्चण्डांशोर्बिडबादतास्स दिशतु श्रेयांसि हास्यो रसः ॥ २ ॥

कल्याणायास्तुव(ः) काम(मं) कारुण्य(ा)यस्य वासवः ।
एकं प्रभुञ्जाहल्यायां पुनर्लेभे सहस्रधा ॥ ३ ॥

* * *

अस्ति (ख)लु परेन्द्राग्रहारनायकमणेः सामवेद-
सागरसांयात्रिकस्य अष्टभाषाकवितासांराज्याभिषिक्त-
स्य पल्लाळरायकटकविकुलगर्वपर्वतपवेः नागणकविना-
गकेसरिणः श्रीमतः कविप्रभोः पौत्रः पुत्रः श्री-
राजनाथदेशिकस्य ब्रह्माण्डभाण्डपिचण्डमण्डलित-
डिण्डिमरवचण्डिम्नः श्रीकण्ठागमशिखण्डमन्डनमणेः श्री-
डिण्डिमप्रभोः दौहित्रः श्रीमदभिरामनायिकास्त-
नन्धयः सभापतिभट्टारकार्यभागिनेयः श्रीडिण्डिम-
कविसार्वभौम इति प्रथितविरुदनामधेयः सुलभभाग-
धेयः सरस्वतीप्रसादलब्धकविताप्रसादः श्रीमानरुणागि-
रिनाथो नाम। तेन (प्रणीतेन) सोमवल्लियोगानन्द-
नाम्ना प्रहसनेन सभानियोगमनुतिष्ठामि ।

End:

तथापीदमस्तु भरतवाक्यम् ।

काळाम्भोदा युवानो झळझळनिनदापूरिताशावकाशैः
पाथोरेतोऽभिवर्षैर्विदधतु वसुधामुल्लसत्सस्यगर्भाम् ॥
हरिः ॐ ।

Colophon:

प्रहसनं समाप्तम् ॥

Subject: Yogānandaprahasanam.

Remarks:—The Ms. is in a fairly good condition.

The author of this prahasana, Aruṇagirinātha is the same as the famous commentator on the works of Kālidāsa.

The author was a native of the Chittore district. The plot of the farce turns upon the overtures of a yogin with a virgin. The farce does not seem to have been printed.

॥ योगानन्दम् ॥

4638. YOGĀNANDAM.

Burnell's Catalogue No. 5306. Page 171. Right column.

Substance—Paper. Size—11⅝ × 4⅝ inches. Sheets—14 (7-20). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Aruṇagirinātha. Incomplete.

Beginning:

........खण्डितसच्चरित्रां कचिद्धितेने कपटः सहायम् ।

मस्क ॥ कथमिव ।

हालि ॥ न्यस्यत्क्कापि पटाश्रुते विटमसौ सामे प्रसूत्यतरा

पश्यैनां प्रियया तवेति वचसा धूर्तस्य सा प्रेषिता ।

क्रन्दन्तीमपि तां पुमानिति विटे स्वीकुर्वति स्वेच्छया

पुत्रः पुत्र इहाजनीति कपटां मां सस्वजे तत्सखः ॥

मस्क ॥ ततस्ततः ॥

End, colophon and subject—Same as No. 4637.

Remarks:—The Ms. is in good condition.

॥ लटकमेलकम् ॥

4639. LAṬAKAMELAKAM.

Burnell's Catalogue No. 5301 a.

Substance—Paper. Size—9¾ × 4 inches. Sheets—16 (1-16). Lines—8 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Śaṅkhadhara. Complete.

Beginning:

गौरीचुम्बनचञ्चलाञ्चलचलच्चन्द्रप्रभामण्डल-
व्यावल्गत्फणिकुण्डलं रतिरसप्रस्विन्नगण्डस्थलम् ।
प्रौढप्रेमपरम्परापरिचयप्रोत्फुल्लनेत्राञ्चलं
शम्भोरस्तु विभूतये त्रिजगतामुन्मत्तगंङ्गा शिरः ॥

End:

तथापीदमस्तु ॥

भूदेवाः स्वस्ति वाचो विरमतु दुरितं निर्जराः सन्तु सन्तः
सन्तु प्रौढारिवीरप्रतिविकलकलाशालिनः क्षोणिपालाः ।
आस्तां विद्वत्प्रकामं प्रवणपटुचमत्कारि काव्यं कवीना-
मस्तु व्यामोहशान्तिस्सृजति हृदि मुदं निश्चलश्चन्द्रचूडः ॥
इति निष्क्रान्ताः सर्वे ॥

Colophon:

दन्तुरापरिणयो नाम द्वितियोऽङ्कः समाप्तः ॥

Subject: Laṭakamelaka Prahasana 1-2 acts.

Remarks:—The Ms. is in a fairly good condition. The other work contained herein is Dhūrtasamāgamaprahasana. This work is not however noticed by Dr. Burnell in his catalogue under this number.

Śaṅkhabhadrakavirāja wrote this farce under the patronage of the Kānyakubja king, Govindacandra in the 12th century. The farce is otherwise known as Danturāpariṇayam. The plot turns round Danturā and Madanamañjarī. The work has been published by the Nirṇayasāgara Press, Bombay.

॥ लटकमेलकम् ॥

4640. LAṬAKAMELAKAM.

Burnell's Catalogue No. 5302 a.

Substance—Paper. Size—9⅜ × 3¼ inches. Sheets—35 (1-35). Lines—6 to a Page. Script—Devanāgarī. No. of Granthas—300. Author—Śankhabhadra. Complete.

Beginning, end, colophon and subject—Same as No. 4639.

Remarks:—The Ms. is in a fairly good condition. Dr. Burnell has noted this work under this No.

॥ सुभगानन्दम् ॥

4641. SUBHAGĀNANDAM.

Burnell's Catalogue No. 10661. Page 174. Left column.

Substance—Palm leaf. Size—15 × 1¼ inches. Leaves—24. Lines—6 to a Page. Script—Telugu. No. of Granthas—600. Author—Vāsudevakavīndra. Complete.

Beginning:

श्रीमहागणपतये नमः ॥

वात्सल्याद्युगपत्कपोलयुगलीमासन्नयोश्चुम्बितुं

पित्रोरात्मभवस्य येन वदने नीतेऽन्यतः सत्वरम् ।

अन्योन्यस्य तयोरभूद्वदनयोः सु......क्रिया

तद्दर्शी करतालकैः स विहसन् लम्बोदरः पातु वः ॥

(नान्द्यन्ते)

सूत्रधारः ॥ * * *

काशी....महाम्बिकातनुभवः श्रीवासुदेवात्मजः

श्रीमान्गोतमगोत्रभूः कवयितुं वाचां प्रतीतप्रथः ।

हारस्मेरयशाः प्रतापतपनप्रद्योतिताशाम्बरः

सन्याजश्रमपादपो विजयते वत्साङ्कभूवल्लभः ॥

(सशिरःकम्पम् ।)

दशशतपदपद्मचतुर्मुखमुखाचिरविहृतिखेदिनी वाणी ।

एकस्मिन्नस्य मुखे खेलति वत्साङ्कनरवरस्य सुरतम् ॥

End:

विश्वस्ता सुरता भवन्तु सततं संन्यासिनो वर्णिका

सङ्गदमठचेटिका............

यूनां पीनतरं प्रसर्पतु............निभं

कारिणं सहसा स्तनौ च भवतामाज्ञानतुम्बायितौ ॥

तथा भवत्विति निष्क्रान्ताः सर्वे ॥

Colophon:

काश्मीरीयखण्डीयरायदौहित्रमल्लत्रिविधवीरचूडामणिरायगोत्रगोविन्द-

श्रीवत्साङ्कापरनामधेयश्रीवासुदेवनरेन्द्रविरचितं सुभगानन्दं नाम

प्रहसनं सम्पूर्णम् ॥

डोलकक्षरमणः(?) कामारण्यमहायतिः ।

भवतां भवतां भूत्यै आचन्द्रमहतारकम् ॥

अश्वत्थशाखामयचापकोटौ विहाय गङ्गातटगर्भमौर्वीम् ।

जहार रण्डा यतिभस्मयागे तूर्णोदसङ्गस्तुलसीदलाक्षम् ॥

कर्कटानां विवाहे तु गार्दभाः परगायकाः ।

परस्परं प्रशंसन्ति अहो रूपमहो ध्वनिः ॥

शुभमस्तु ॥ श्रीमन्महागणपतये नमः ॥ सरस्वत्यै नमः ॥

Subject: Subhagānanda.

Remarks:—The Ms. is in a fairly good condition.

The author of this Prahasana, Vāsudeva seems to have had another name, Govindaśrīvatsāṅka and was a native of Kashmir. The colophon says he was a king of Kashmir. The farce is not available in print.

———

॥ व्यायोगाः ॥

VYĀYOGAS.

॥ धनञ्जयविजयव्यायोगः ॥

4642. DHANAÑJAYAVIJAYĀVYAYOGAḤ.

Burnell's Catalogue No. 5259. Page 168. Right column. Substance—Paper. Size—8½ × 4¼ inches. Sheets—12. Lines—10 to 12 to a Page. Script—Devanāgari. No. of Granthas—240. Author—Kāñcana. Complete.

Beginning:

॥ गणपतिर्जयति ॥

हरेर्लीलावराहस्य दंष्ट्रादण्डः स पातु नः ।
हेमाद्रिकलशा यत्र धात्री छत्रश्रियं दधौ ॥ १ ॥

तद्वः प्रमाष्टु विपदः प्रणतार्तिहन्तृ
न्यस्तं पदं महिषमूर्धनि चण्डिकायाः ।
वैरी यदीयनखरांशुपरीतशृङ्गः
शक्रायुधाङ्कितनताम्बुधरभ्रमोऽभूत् ॥

End:

सारस्वतं स्फुरतु चेतसि सज्जनानां
चक्षुर्भवन्तु कृतिनो गतमत्सराश्च ।
भूपाश्च सत्कविषु सूक्तिषु सानुरागाः
सन्त्यज्य चण्डजनताप्रणयानुबन्धम् ॥

॥ इति निष्क्रान्ताः सर्वे ॥

Colophon:

इति श्रीधनञ्जयविजयो नाम व्यायोगः समाप्तः ॥

Subject: Dhanañjayavijayavyāyoga.

Remarks:—The Ms. is in a fairly good condition. On the last page

is given six stray verses.

The author of this drama Kāñcana Paṇḍita tells us that he is the son of one Nārāyaṇa. His date is not clear.

The drama deals with the story of the cattle raid carried on by the Kauravas in the dominion of the King of Virāṭa and their defeat etc. This has been published by the Nirṇayasāgara Press, Bombay.

॥ धनञ्जयविजयव्यायोगः ॥

4643. DHANAÑJAYAVIJAYAVYĀYOGAḤ.

Burnell's Catalogue No. 10635 b. Page 160. Right column. Substance—Palm leaf. Size—15×1¼ inches. Leaves—7. Lines—8 to a Page. Script—Grantha. No. of Granthas—150. Author—Kāñcana. Incomplete. Wants beginning and end)

Beginning:

(सविनयम्) आर्य स खलु युष्मदनुजोऽयं युष्मत्प्रसाद एव ।

End:

गोरक्षणं समदशात्रवमानभङ्गः
प्रीतिर्विराटनृपतेरुपकारिणश्च ।
पर्याप्तमेक...... ......रसवाय
सर्वं पुनर्मिलितमत्र ममैव भाग्यैः ॥

Subject: Dhanañjayavijayavyāyoga.

Remarks:—The Ms. is in a decaying condition and one side is completely rat-eaten. The other work contained herein is नलानन्दम् ।

॥ धनञ्जयविजयव्यायोगः ॥

4644. DHANAÑJAYAVIJAYAVYĀYOGAḤ.

P. A. Collection No. 362. Substance—Paper. Size—10×4 inches. Sheets—12. Lines—10 to a Page. Script—Devanāgarī. No. of Granthas—250. Author—Kāñcanācārya. Complete.

Beginning, end, colophon and subject—Same as No. 4642.

Remarks:—The Ms. is in a fairly good condition.

On the the title page is given

इदं पुस्तकं जयन्तगणेशस्य

॥ प्रचण्डभैरवः ॥

4645. PRACAṆḌABHAIRAVAḤ.

Burnell's Catalogue No. 5244. Page 169. Left column. Substance—Paper. Size—11×4½ inches. Sheets—7. Lines -11 to 12 to a Page. Script—Devanāgarī. No. of Granthas—230. Author—Sadāśiva. Complete.

Beginning:

श्रीगणेशाय नमः ॥

पायात्पातालचक्राक्रमणकृतभरोद्भ्रान्तभोगीन्द्रमुक्त-
फूत्कारक्रुद्धकूर्मोन्मितनिजनमन्पृष्ठनिष्ठास्थिकूटम् ।
उत्क्षिप्तव्यस्तहस्तोच्छ्वसितफणिफणोद्दीप्तकालाग्निदग्धं
ब्रह्माण्डोद्दण्डभाण्डस्फुटनपटुरवं ताण्डवं चण्डिकायाः ॥

॥ नान्द्यन्ते सूत्रधारः ॥

अलमतिप्रस्तुतेन ।

* *

पारिपार्श्वकः । भाव किमतः परं विलम्बसे । आज्ञप्तो-
ऽस्मि अनेकगुणगरिमगम्भीरैः प्रचण्डपाखण्डखण्डनैः
दिव्यवीरसाधकैस्तावत् । यदद्य तस्य तर्कारण्यकण्ठीर-
वस्य सदाशिवकवीन्द्रस्य प्रचण्डभैरवो नाम
व्यायोगः प्रयुज्यतामिति ॥

सू ॥ सहर्षम् । मारिष तदृह्यतां नेपथ्यम् ।

* * *

सू ॥ पश्य । मन्त्रध्वनिध्वनितदिक्करिकर्णकूटः
चैत्यानलोज्वलितमार्गमुदीक्षमाणः ।
उत्सारयन्विकटमस्रपचक्रमेत-
द्भीमं श्मशानमुखमेष विशत्यशङ्कः ॥

तदेहि अनन्तरकरणीयाय सज्जीभवावः । इति निष्क्रान्तौ ॥

प्रस्तावना ॥

End:

वि ॥ कथिदं चामुंडि आजाणादि ।
एशे संवादवुत्तंते ।

सर्वे ॥ (सरोमा................ ।

Subject: Pracaṇḍabhairavavyāyogaḥ.

Remarks:—The Ms. is in a fairly good condition.

Sadāśiva, the author of this Vyāyoga tells us that he was a great Naiyāyika. More about him is unknown at present.

This Vyāyoga deals with the story of the fight between Hirṇyagarbha and Puṇḍarīka in a Śmaśāna and in the mean-

while Bhairava comes upon the scene and the fight assumes a fiercer aspect.

The Vyāyoga is not available in print.

On the title page is found Samvat 1740, corresponding to A. D. 1683.

॥ विनतानन्दः ॥

4646. VINATĀNANDAḤ.

Burnell's Catalogue No. 5242. Page 172. Right column. Substance—Paper. Size—$11\frac{7}{8} \times 5\frac{3}{8}$ inches. Sheets—48. Lines—9 to a Page. Script—Devanāgarī. No. of Granthas—1850. Author—Govinda. Complete.

Beginning:

दर्पाहंपूर्वभाग्यव्यतिकरकुपितान्योन्यफूत्कारकारि-
स्फायत्कर्णावतंसद्विरसनधमनीभास्त्रिकाध्माततीव्रे ।
श्च्योतन्मौलिस्रवन्तीजलकणनयनाङ्गारधाराकृशाना-
वावर्ते निष्कलङ्कं त्रिपुरहरशिखामण्डनं वो मुदेऽस्तु ॥

*　　　　　　*

(नान्द्यन्ते)

सूत्रधारः ॥ रमणीयतरं खल्वदो रूपकमुपक्रममाणस्य कवेरुचितेष्टदेवतानुसन्धानम् ।

वाल्मीकिवत्समुखचालनसंस्तुतायां
व्यासो दुदोह निगमोरुचतुस्तनीङ्गाम् ।
जुष्टां गुणाढ्यकविराण्मुखफेनभागै-
स्तां देवतां सकलकामदुघां प्रपद्ये ॥ १ ॥

(समाधाय रङ्गमवलोक्य)

भो भो भगवतः स्वभिनीतदशरूपकस्य सोपसंहरण-भुवनसृष्टिनाटकसूत्रधारस्य प्रस्तावितबहलमङ्गलनिगम-नान्दीकरस्य दुरवगाहमायाबलप्रदर्शितालीकबहुरूपप्रप-ञ्चेन्द्रजालस्य * कौस्तुभसमवलीनाग्निबिन्दोर्बिन्दुमा-धवस्य यात्रायामुपस्थातव्याः सभास्ताराः । किमप्यमृत-संहितं परमपावनमाख्यानकमभिनिनीषुः पक्षधरो नाम भरतकुलपुत्रः तत्रभवतामवधानसमयमर्थये । यतः ॥

अकाले चापलादात्मवैकल्यात्परितप्यते ।
समयं यावदाप्नोति कुटिलेभ्यः पराभवम् ॥

* * *

सूत्रधारः॥ (स्मृतिमभिनीय) (सहर्षम्) तदेतद्गोदाव-रीपरिसरप्रसिद्धनन्दिपुरभुवामधिगतसकलविद्यानां शे-षपदवीजुषामनूचानपराशरयज्वनां वंश्येन विश्व-विश्रुतगुणग्रामेण वाराणसीवास्तव्येन कविना ॥

शेषीकं कुलदैवतं नरहरिं भीमाम्बिकां मातरं
ख्यातानन्तसुतं प्रणम्य पितरं श्रीशेषयज्ञेश्वरम् ।
श्रीविष्णुं नवमञ्चगोत्रदशर्मीं यः प्राप शेषाभिधां
गोविन्देन कृतश्रमेण रचितं प्रीत्यै सतां रूपकम् ॥

तेनैव सौपर्णेन प्रचण्डगरुडापरनाम्ना विनतानन्द-व्यायोगेनाभिनीयमानेन सामाजिकानुपास्महे ।

End:

तथापीदमस्तु भरतवाक्यम् ॥

दितिजनिषु सकुत्साः पद्मयोनौ सलज्जाः
सुरपरिषदि मूकाश्चन्द्रमौलौ विलक्षाः ।
परिचित इव तारामैत्रकेणेव शौरेः
मुखशशिनि समुत्काः पान्तु वः श्रीदृगन्ताः ॥ ६१ ॥

॥ अपि च ॥

एतन्नैगमिकं पवित्रमृषिभिर्जुष्टं समस्तेष्टदं
नीतं श्रव्यधुरां सुपर्णचरितं पाराशर्यैर्भुवि ।
भूयस्तद्भरतप्रणीतविधिना दृश्याभिनेयार्हतां
यत्नादानयतः कवेः श्रममभी जानन्तु सामाजिकाः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

विनतानन्दोनामाङ्कः । समाप्तश्चायं प्रचण्डगरुडो नाम व्यायोगः ॥

यदात्मा यच्चेताः प्रणयति कविस्तस्य धिषणा
परीपाकमन्थश्रममखिलमाज्ञाय विधुरः ।
अहं पुष्टाभाव्यात्वितथमथसङ्कोचयति चे-
दसूयुर्नात्यमं तदपि वरमज्ञस्तुतिशतात् ॥ २३ ॥

लक्ष्मीनृसिंहार्पणमस्तु ॥

Subject: Vinatānandavyāyoga.

Remarks:—The Ms. is in good condition. On the title page is given

'श्रीसर्वविद्यानिधानकवीन्द्राचार्यसरस्वतीनां' विनतानन्दव्यायोगः ॥

The script is peculiar and is believed to be his own writing. In a later hand we find Saṃvat 1740, written on it. The Ms. is full of scriptorial errors.

This Vyāyoga is otherwise known as Pracaṇḍgaruḍa. The author Govinda was born in the town of Nandapura on the Godavari and settled later on in Benares. His father was Śeṣayajñeśvara, otherwise and widely known as Anantasuta.

The Vyāyoga deals with the story of the bringing of Amṛta by Garuḍa to his mother, Vinata. The Vyāyoga is not available in print.

॥ नाटकाः ॥

NĀTIKĀS.

॥ उषारागोदया नाटिका ॥

4647. UṢĀRĀGODAYĀNĀṬIKĀ.

Burnell's Catalogue No. 5249. Page 167. Right column. Substance—Paper. Size—8½ × 4 inches. Sheets—34. Lines—9 to a Page. Script—Devanāgari. No. of Granthas—612. Author—Rudradeva. Incomplete. (Wants end).

Beginning:

श्रीगणेशाय नमः ॥

प्रणयकलहकोपात्पाटलिम्नि प्रजाते
मुखशशिनि परार्धे पाण्डुरत्वे च भूयः ।
प्रकटितनिजदेहद्वन्द्वसीमाविभेदं
वपुरथ शिवयोस्तद्भूतये सर्वदास्ताम् ॥ १ ॥

(नान्द्यन्ते सूत्रधारः ॥)

सूत्रधारः ॥ अलमतिविस्तरेण । (नेपथ्याभिमुखमवलोक्य ।) आर्ये इतस्तावत् । (उपसृत्य नटी ।)

नटी ॥ इयं हि आणवेदु अज्जउत्तो ।

सूत्र ॥ आर्ये उषारागोदया नाम नाटिका नाटयितव्यास्ति । तत्त्वरस्व नेपथ्यग्रहणाय । यावदेषोऽहमपि दत्तावधानानपि सामाजिकानभ्यर्थये ।

नटी ॥ जं अज्जउत्तो आणवेदी (इति निष्क्रान्ता ।)

सूत्र ॥ (सर्वतोऽवलोक्य ॥)

भगवद्गुणानुवादादभिनवबन्धप्रसङ्गाच ।
परिभावयन्त्ववहिताः कृतिमेतां रुद्रदेवस्य ॥

(नेपथ्ये) भवत्ववहिताः स्मः ।

सूत्र ॥ (पुरोऽवलोक्य)

इह जरठातपकाले प्रागेवोद्वेजयति भगवान्मार्तण्डः ।

बाणादिह परिमुक्तो लोहितमध्ये स्थितोऽतिशल्य इव ॥

अयेऽनिरुद्धो गिरिणा सहसोषारागरञ्जितोऽभ्येति ।

(नेपथ्ये) साधु रे भरतपुत्र साधु

(बाणादिति पुनः पठति ॥)

॥ (ततः प्रविशति नटी) ॥

(तावदाकाशे समुच्चरति नाभिव्यक्तार्था भारती ।
सर्वे ससम्भ्रममाकर्णयन्ति)

सूत्र ॥ (आकाशे कर्णं दत्वा) । किमाज्ञापयति भगवती यदुत विजितं कंसारिणा तदागमनं प्रतीक्षमाणा असमयजनितवसन्तोत्सवेन पुरीमानन्दयन्तु द्वारकौकस इति ॥

End:

(ततः प्रविशति यथा निर्दिष्टा उषा) (समुपसृत्य)

चित्र ॥ (विभाव्य) पिअसहि देवेसिणो पडिवं देहि चलणा ।

उषा ॥ प्रस्विन्नपाणितलाभ्यामुपस्पृशति चरणौ ।

नार ॥ वत्से भजस्व मनोऽभिलषितां सिद्धिम् ।

देवी ॥ (सविनयं समुत्थाय पार्श्वे समुपवेशयति सर्वे नारदमुखमवलोकयन्ति)

देवी ॥ भअवं अग्गि अज्जेक्का विणिज्जजीअदु ।

नार ॥

परस्पर..............णाम् ।

तत्संवृत्तप्रायमस्ति । तदप्यस्या...

पथी कनककदलीस्तम्भानभित स्त्रिः प्र-

...................यमादाय कु....

Colophon: (Sheet No. 27)

इति निष्क्रान्तौ ॥ तृतीयोऽङ्कः ॥

(Sheet No. 34)

इदं पुस्तकं मुद्गलेश्वरभट्टानाम् ॥

Subject: Uṣārāgodayanāṭikā 1-4 acts.

Remarks:—The Ms. is in good condition. The Ms abruptly ends with the ending portion of the 4th act.

Rudradeva is the author of this Nāṭikā. Who this author and what his date is are not clear.

The Nāṭikā deals with the love between Uṣā and Aniruddha. The Nāṭikā is unprinted.

॥ कमलिनीकलहंसम् ॥

4648. KAMALINĪKALAHAMSAM.

J. L. Collection No. 664. Substance—Paper. Size—12×5 inches. Sheets—31. Lines—11 to a page. Script—Devanāgarī. No. of Granthas—600. Author—Rājacūḍāmaṇidīkṣita. Complete.

Beginning:

श्रीगणेशाय नमः ॥

यस्योपवीतगुण एव फणावृतैक-

वक्षोरुहः कचपटीयति वामभागे ।

तस्मै ममास्तु मनसामवसानसीम्ने
चन्द्रार्धचारुशिरसे महसे नमस्या ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

साहित्ये रमतां मनः सुमनसां सन्तो भजन्तां सुखं
सोमालङ्कृतशेखरे भवतु मे वामाङ्कजानौ मतिः ।
धीरंश्रीचिनचव्वयाच्युतधराधौरेयभाग्योन्नतो
राज्यश्री रघुनाथनायकविभौ रज्यन्तु सहस्रं स माः ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon:

चतुर्थोऽङ्कः ॥

इति चूडामणिदीक्षितस्य कृतौ कमलिनीकलहंसाभिधाननाटिका
सम्पूर्णा ॥

पुस्तके लिखितं यादृक् तादृशं लिखितं मया ।
तथापि यो मे व्यत्यासो लेखने क्रियतां क्षमा ॥

श्रीशिवाय परमगुरवे नमः ॥

श्रीलक्ष्मीनृसिंहार्पणमस्तु ।

इदं पुस्तकं वृकापनाम्नो गङ्गाधरदीक्षितस्येति ज्ञेयम् ॥

श्री वं महादेव प्रसन्न ॥

Subject: **Kamalinīkalahamsa 1-4 acts.**

Remarks:—The Ms. is in good condition.

The **Kamalinīkalahamsanāṭikā** was composed by **Rājacūḍāmaṇi Dīkṣita** while yet he was a boy of six. **For further information** regarding **Rājacūḍāmaṇi** and his **works**, please refer to the Introduction to the Rukmiṇīkalyāṇa, published by the

Adyar Library, Adyar.

In this Nāṭika, Kamalinī daughter of Kamalākara is married to Kalahaṃsa after being rescued from a stork. The work has been published by the Śrī Vāṇī Vilās Press, Srīraṅgam.

॥ कमलिनीकलहंसम् ॥

4649. KAMALINĪKALAHAMSAM.

S. S. Collection No. 52 a. Substance—Palm leaf. Size—$17\frac{1}{2} \times 1\frac{3}{8}$ inches. Leaves—20, Lines—8 to a page. Script—Grantha. No. of Granthas—700. Author—Rājacūḍāmaṇidīkṣita. Complete.

Beginning, end, colophon and subject—Same as No. 4648.

Remarks:—The Ms. is in a fairly good condition.

॥ कमलिनीकलहंसम् ॥

4650. KAMALINĪKALAHAMSAM.

T. S. Collection No. 729. Substance—Paper. Size—$9\frac{1}{8} \times 3\frac{3}{8}$ inches. Sheets—18. Lines—11 to a page. Script—Devanāgarī. No. of Granthas—450. Author—Rājacūḍāmaṇi. Incomplete.

Beginning—Same as No. 4648.

End:

दाणिं हि कमलआणउणसंभमालोअणस्स महाभम-
अं आणेदुं देवी ववस्सइ । ता जाव देवी आअमिस्सेदि
दाव अम्मेहि महाभा··· ।

Colophon: (Sheet No. 17)

द्वितीयोऽङ्कः

Subject: Kamalinīkalahaṃsa 1-3 acts.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रियदर्शिका ॥

4651. PRIYADARŚIKĀ.

Burnell's Catalogue No. 5221. Page 169. Right column. Substance—Paper. Size—9¾ × 3¾ inches. Sheets—83. Lines—8 or 9 to a Page. Script—Devanāgarī. No. of Granthas—800. Author—Śrīharṣa. Complete.

Beginning:

धूमव्याकुलदृष्टिरिन्दुकिरणैराह्लादिताक्षी पुनः
पश्यन्ती वरमुत्सुका नतमुखी भूयो ह्रिया ब्रह्मणः ।
सेर्ष्यापादनखेन्दुदर्पणगते गङ्गां दधाने हरे
स्पर्शादुत्पुलका करग्रहविधौ गौरी शिवायास्तु नः ॥

End:

उर्वीमुद्दामसस्यां जनयतु विसृजन् वासवो वृष्टिमिष्टा-
मिष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः ।
आकल्पान्तं च भूयात्स्थिरमुपरचिता सङ्गतिः सज्जनानां
निःशेषं यान्तु शान्तिं पिशुनजनगिरो दुःसहा वज्रलेपाः ॥

Colophon :

इति निष्क्रान्ताः सर्वे ॥

Subject: Priyadarśikā 1-4 acts

Remarks:—The Ms. is in a fairly good condition.

This is one of the three dramas of the famous Royal poet

and dramatist, the patron of Bāṇabhaṭṭa, Harṣa Vardhana.

The work deals with the story of the marriage of Vatsarāja with Priyadarśikā, who for some time lives in the palace of Vatsarāja's first wife as her maid, in the name of Āraṇyaka. Queen Vāsavadattā finally agrees to the marriage. The drama has been printed by the Śrī Vāṇī Vilās Press.

॥ प्रियदर्शिका ॥

4652. PRIYADARŚIKĀ.

Burnell's Catalogue No 10503. Page 169. Right column.
Substance - Palm leaf. Size—15½ × 1½ inches. Leaves —22. Lines—5 to 8 to a Page. Script —Grantha. No. of Granthas—800. Author—Śrīharṣa. Complete.

Beginning, end, colophon and subject—Same as No. 4651.

Remarks:—The Ms. is in a fairly good condition.

॥ प्रियदर्शिका ॥

4653. PRIYADARŚIKĀ.

Burnell's Catalogue No. 10310. Page 169. Right column.
Substance—Palm Leaf. Size—8 × 1½ inches. Leaves—21 (72-92). Lines—8 to a Page. Script—Grantha. No. of Granthas—800. Author—Śrīharṣa. Complete.

Beginning, end and subject—Same as No. 4651.

Colophon :

चतुर्थोऽङ्कः ।

शेषाद्रेः स्वहस्तेन प्रियदर्शिकानाम नाटिका समाप्ता लिखिता

End:

उर्वीमुद्दामसस्यां जनयतु विकिरन्वासवो वृष्टिमिष्टा-

मिष्टैस्त्रैविष्टपानां विदधतु विधिवत्प्रीणनं विप्रमुख्याः ।

आकल्पान्तं च भूयात्स्थिरसमुचितं सङ्गतं सज्जनानां

निःशेषं यातु नाशं पिशुनजनवचो दुःसहं वज्रलेपम् ॥

Colophon:

चतुर्थोऽङ्कः ॥

समाप्ता रत्नावली नाम नाटिका ॥

Subject: Ratnāvalī Nāṭikā 1-4 acts.

Remarks:—The Ms. is in a fairly good condition.

Ratnāvalī is a princess of Ceylon and by some misfortune she is wrecked while on boat and she goes over to Vatsarāja where she lives incognito. Vāsavadattā does not like that the king should see her but in spite of that the king and Ratnāvalī—aliās Sāgarikā are brought together and in the end happily enough Vāsavadattā celebrates the marriage of her husband with Sāgarikā.

The drama is by Śrīharṣa and it has been published by the Nirṇayasāgar Press, Bombay.

Descriptive No.	Collection No.	Substance	Size inches	No. of Sheets or leaves
4658	B L. 5285	Paper.	$8\frac{1}{4} \times 5\frac{1}{4}$	28
4659	,, 5237	do.	$9\frac{1}{4} \times 3\frac{3}{4}$	48
4660	,, 10626	Palm leaf.	$17 \times 1\frac{1}{2}$	36
4661	,, 10627 a	do.	$8\frac{1}{2} \times 1\frac{1}{2}$	21
4662	,, b	do.	$13\frac{3}{4} \times 1\frac{1}{8}$	38
4663	,, 10628	do.	$18\frac{1}{4} \times 1\frac{1}{2}$	31
4664	J. L. 667	Paper.	8×5	26
4665	,, 668	do.	10×4	29
4666	S. S. 118	Palm leaf.	$17 \times 1\frac{1}{2}$	14
4667	P. A. 359	Paper.	$8\frac{3}{4} \times 4$	27
4668	B. L. 10629	Palm leaf.	$16\frac{1}{2} \times 1\frac{1}{4}$	25
4669	,, 10630	do.	$14\frac{3}{4} \times 1\frac{1}{2}$	23
4670	,, 10631	do.	$15 \times 1\frac{3}{4}$	15
4671	,, 5236	Paper.	$9\frac{1}{2} \times 3\frac{3}{4}$	16

No. of Lines per Page or Sheet.	Script	Complete or otherwise.
14-18	Devanāgarī.	Complete.
8	do.	,,
5 or 6	Telugu.	,,
8	Grantha.	,,
8	do.	,,
7 or 8	do.	,,
15	Devanāgarī.	,,
10	do.	,,
11	Grantha.	,,
14	Devanāgarī.	,,
7	Grantha.	Incomplete (wants end).
7	Telugu.	,,
7 or 8	Grantha.	,,
7-8	Devanāgarī.	,, (1-2 acts, wants end).

॥ रत्नावलीव्याख्या ॥

4672. RATNĀVALĪVYĀKHYĀ.

J. L. Collection No. 669. Substance—Paper. Size—13 × 8¼ inches. Sheets—24. Lines—15 to a page. Script—Devanāgarī. No. of Granthas—1080. Author—Śivabhaṭṭa. Incomplete.

Beginning:

श्रीगणेशाय नमः ॥ श्रीशिवाय नमः ॥

निगमगिरामपि दूरामिक्षुशरासप्रसूनबाणकराम् ।
निरवधिकरुणामरुणां शरणं कलयामि चन्द्रचूडालाम् ॥

शोणाम्बरमुदितारुणकिरणारुणमाश्रये शरणम् ।
शरणागतभरणाश्रत्करुणाविरुणालयं तेजः ॥ १ ॥

पदवाक्यप्रमाणज्ञश्रीहर्षो निपुणः कविः ।
रत्नावलीनाटिकाख्यमकरोदुपरूपकम् ॥

शिवाभिधेन विदुषा त्र्यम्बकार्यतनूभुवा ।
रत्नावल्या हर्षदाया रच्यते दीधितिः स्फुटा ॥

अथ तत्रभवान् भवानीचरणपरिचरणसमधिगताममन्दमाकन्दमरन्दनिष्यन्दसन्दोहमधुरताधरतासम्पादककवितापङ्कजसवितानवद्यगद्यपद्यात्मकप्रबन्धपरिचयसमुत्पादित-सकलरसिकजनहृदयहर्षः श्रीहर्षः चिकीर्षितस्य रत्नावलीनाटिकाख्योपरूपकस्य परिसमाप्तये निजेष्टदेवतासम्बन्धिपुष्पाञ्जलिकर्तृकरक्षणप्रार्थनारूपं मङ्गलमारचयन् पूर्वरङ्गाङ्गभूतामाशीरलङ्कृतां नान्दीं तावदाह—

॥ पादाग्रेति ॥ तदाराधने तत्सकलपुरुषार्थप्रदत्वेन प्रसिद्धं यदाराधनं भगवद्भजनं तस्मिन्नित्यर्थः। पादाग्रस्थितया चरणाग्रोच्छ्रितया सर्वोन्नतं भगवन्तमाराधयितुमुन्नतयेति भावः ॥

End:

॥ अथ वेति ॥ अथ वा न कमलाकरं वर्जयित्वा राजहंसी अन्यस्मिन्नभिरमते ॥ कमलाकरं पङ्कजवनघटाकम्। अन्यत्र कमलाया आकरमुत्पत्तिस्थानमित्यर्थः। राजहंसी हंसी। अन्यत्र राजहंसस्य राजश्रेष्ठस्यापत्यं स्त्री राजहंसी रत्नावली ॥.........

Colophon: (Sheet No. 32).

बालेन यदकारीत्थं रत्नावल्यर्थवर्णने।
चापलं तन्मुदे भूयाद्विदुषां गुणवेदिनाम ॥
श्रीत्र्यम्बकतनूजस्य शिवस्य विदुषः कृतौ।
रत्नावलीदीधितौ हि प्रथमांशोऽभवत्स्फुटम् ॥

इति रत्नावलीदीधितौ प्रथमोऽङ्कः ॥

शिवो जयति ॥

Subject: Ratnāvalīvyākhyā known as Dīdhiti 1-2 acts.

Remarks:—The Ms. abruptly ends in the beginning of the second act.

The author of this incomplete commentary is one Śivabhaṭṭa son of Tryambaka. The commentary is not available in print.

॥ विद्धसालभञ्जिका ॥

4673. VIDDHASĀLABHAÑJIKĀ.

Burnell's Catalogue No. 10694. **Page** 172. Right column.

Substance—Palm leaf. Size—$14\frac{1}{2} \times 1\frac{1}{4}$ inches. **Leaves** —27. Lines—7 to a Page. Script—Grantha. No. of Granthas—800. Author—Rājaśekhara. Complete.

Beginning:

श्रीगुहाय नमः ॥

कुलगुरुरबलानां केलिदीक्षाप्रधाने
परमसुहृदनङ्गो रोहिणीवल्लभस्य ।
अपि कुसुमपृषत्कैर्देवदेवस्य जेता
जयति सुरतलीलानाटिकासूत्रधारः ॥

End:

तथापीदमस्तु भरतवाक्यम् ॥

वामाङ्कं पृथुलस्तनस्तबकितं यावद्भवानीपते·
र्लक्ष्मीकण्ठ(परिग्रहव्यसनितां यावच्च दोष्णां हरेः ।
यावच्च प्रति)सामसारणविधिव्यग्रौ करौ ब्रह्मणः
स्थेयासुः श्रुतिशुक्तिलेखमथना तावत्सतां सूक्तयः ।

(इति परिक्रम्य निष्क्रान्ताः सर्वे ॥)

Colophon:

इति परिकर्म............

कविवरविरचिता विद्धसालभञ्जिका नाटिका संपूर्णा ।

श्रीताम्रचूडाय नमः । विनायकाय नमः ॥

Subject: Viddhasālabhañjikā.

Remarks:—The Ms. is in a fairly good condition.

On the title page is given

अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सिबर्हिषि ॥

श्रीनीलकण्ठदीक्षितानाम् गीर्वाणेन्द्रदीक्षितानाम् ,

' अप्पादीक्षितानाम् ।

(in a later hand is given)

अप्पादीक्षितस्य विद्धसालभञ्जिका प्रसन्नराघवनाटकञ्च'

The Viddhasālabhañjikā of Rājaśekhara deals with the story of the marriage of Vidyādharamalla with Mṛgāṅkavallī and Kuvalayamālā while there was a queen already. The marriage is brought about by a series of strategems. For the date etc. of Rājaśekhara see remarks under No. 4585.

The drama has been printed in Calcutta by Paṇḍit Jīvānanda Vidyāsagar.

॥ विद्धसालभञ्जिका ॥

4674. VIDDHASĀLABHAÑJIKĀ.

Burnell's Catalogue No. 10695. Page 172. Left column.

Substance—Palm leaf. Size—$16\frac{1}{2} \times 1\frac{1}{2}$ inches. Leaves—21. Lines—8 or 9 to a Page. Script—Grantha. No. of Granthas—800. Author—Rājaśekhara. Complete.

